**PHALITA JYOTISHAM**

**ACHARYA 2nd YEAR**
**Course/Paper-10**

# स्वशास्त्रीयेतिहास: निबन्धश्च

## *Svaśāstrīyētihāsa: Nibandhaśca*


**CENTER OF DISTANCE & ONLINE EDUCATION**

*(Formerly Directorate of Distance Education)*

**NATIONAL SANSKRIT UNIVERSITY :: TIRUPATI-517 507 (A.P)**

*(Erstwhile Rashtriya Sanskrit Vidyapeetha, Tirupati)*

## CHIEF EDITOR

## Vice-Chancellor

**GENERAL EDITOR**

Dr.Ch.P.Satyanarayana
Director, DDE

**PROGRAME CO-ORDINATOR**

Dr.Ch.P.Satyanarayana

**ADDITIONAL CO-ORDINATORS**

1. Dr.R.Deepta (Academic)
2. Sri.B.chandrasekharam (Technical)

**SUBJECT CO-ORDINATOR**

Dr. A.Sripada Bhat

**COURSE WRITER**

Dr.Prasad Gokhale

**DIRECTORATE OF DISTANCE EDUCATION**
**R.S.VIDYAPEETHA,**
**TIRUPATI.**

**अयि प्रियान्तेवासिनः,**

**शुभाभिनन्दनानि,**

स्वागतं भवतां राष्ट्रिय-संस्कृत-विद्यापीठान्तर्गते आराद्विद्या-निदेशक-निकेते। विद्यापीठमिदं राष्ट्रिय-मूल्याङ्कनपरिषदा (NAAC) ए इति, विश्वविद्यालयानुदानायोगेन (UGC) पारम्परिकशास्त्रीय-समुत्कर्षकेन्द्रमिति चोद्घोषितम्।

निकेतोऽयं मातुः सरस्वत्याः आवासस्थानत्वेनाभिमतः यस्मिन् भवतामपि विद्यानन्दाह्लादः लभ्यतेतराम्। संस्कृतवाङ्मयपाटवमभिलषतां भवताम् आधारशिला भवति भवतां श्रद्धैव। श्रद्धायाः प्रोत्साहनार्थम् अध्ययने रुचिमुत्पादयितुञ्च, इयं स्वाध्ययनसामग्री निर्मिता, याञ्च भवन्तः स्वयम् अधिगन्तुं शक्नुवन्ति।

श्रद्धावतः शिष्यस्य एकलव्यस्य गुरूपदेशः "आराद्" मनसि प्रविशति येन च शिष्यः सत्यकामो भवति। आचार्योऽपि श्रद्धावतः शिष्यान् आरादपि दृग्दीक्षाख्योपदेशेन समेधयति कूर्मः स्वपत्यानीव –

**स्वापत्यानि यथा कूर्मो वीक्षणेनैव पोषयेत्।**
**दृग्दीक्षाख्योपदेशस्तु तादृशः कथितः प्रिये।। इति ।**

कुलार्णवागमाम्नातेन दृग्दीक्षाख्योपदेशोपायानुसारिणाचार्येण श्रद्धावान् शिष्यः सत्यकामं जाबालं गौतमः हारिद्रुमतः इव उद्धरिष्यति।

सत्यकामो जाबालः जबालां मातरमामन्त्रयामास। "मातः ब्रह्मचर्यं गुरौ वत्स्यामि किं गोत्रोऽहमि"ति। सा चैनमुवाच – "अहमेतन्न वेद यद्गोत्रस्त्वमसि। गुरुसमीपे सत्यकामो जाबालोऽहमस्मि भोः इति ब्रुवीथाः" इति। एवमेव जाबालः हारिद्रुमतं गौतमं गत्वा "भवत्सु ब्रह्मचर्यं वत्स्यामी"ति प्रार्थयामास। तेन च गोत्रे पृष्टे मात्रा यदुक्तं तदेव प्रोवाच।

गौतमस्तुष्टः सत्यकामं सत्यवादिनमुपनीय चतुश्शतं गावः यूथात् पृथक्कृत्य शिष्याय दत्वोवाच " –यदा एताः चतुश्शतं गावः सहस्रं भवन्ति तदा भवान् गुरुकुलं प्रतिनिवर्तस्व। अधुना चतुश्शतं गाः नीत्वा अरण्ये चारयतात्" इति।

स एवमुक्तः सत्यकामः तृणोदकबहुलम् अरण्यं गाः प्रवेश्य बहुकालं पोषयामास। सम्यग्गावो रक्षिकाः यदा सहस्रं सम्पन्ना बभूवुः तदा यूथस्थः कश्चन ऋषभः सत्यकाममाहूय "सोम्य! वयमधुना सहस्रं सम्पन्नाः अस्मानाचार्यकुलं प्रापय" इत्यादिश्य "ब्रह्मणश्च ते पादं ब्रवाणी"ति स्वयमेव ब्रह्मज्ञानमुपदिशति।

एवम् अग्निः हंसः मद्गुः च सत्यकाममुपदिशन्ति इति आख्यायिका छान्दोग्योपनिषदि चतुर्थाध्याये आम्नाता वर्तते। इयमौपनिषदाख्यायिका आराद्विद्यया केन सादृश्येन सङ्गच्छत इति चेत् उच्यते-

अस्ति तावत् सत्यकामविद्याप्राप्तेः आराद्विद्या निकेततो विद्याप्राप्तेश्च महत् सादृश्यम्। तथाहि- सत्यकामः गुरुकुलात् बहिरेव ब्रह्मविद्यामध्यगीष्ट अधिगमोऽपि मानवेतरमाध्यमेन। यतो हि ऋषभाग्निमद्ग्वादयः उपदेशकर्तारः। अन्ते गुरूपदेशः इति।

आराद्विद्याबोधनमपि विश्वविद्यालयात् दूरे बहिरेव भवति। बोधनसामग्र्यपि प्रवाचकभिन्नमेव मुद्रितपुस्तकसान्द्रमुद्रिकादीति, अन्ते किञ्चित्कालं साक्षादुपदेशः(Contact Programme) इति च।

अतस्सत्यकामवद्विद्याकामा भूत्वा कृतार्था भूयासुरिति धिया पृष्ठपत्रं जाबलोपाख्यानेन सचित्रितम्। अतोऽस्माकमवगत्यान्तरङ्गं श्रद्धया पाठ्यांशानामध्ययने रता भवन्तु।

**श्रद्धावान् लभते ज्ञानं तत्परः संयतेन्द्रियः।**
**ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति।।**

निदेशकः

# विषयसूची

**प्रथम खण्डः**

ज्योतिषशास्त्रस्योत्पत्तिः विकासः च १-९

**द्वितीयखण्डः**

ज्योतिषस्य होरास्कन्धः १०-१५

**तृतीयखण्डः**

संहितास्कन्धः १६-२१

**चतुर्थखण्डः**

सिद्धान्तस्कन्धः २२-३१

**पञ्चमखण्डः**

वेदाङ्गत्वम् ३२-४०

**षष्ठः खण्डः** ४१-५०

आयुर्निरूपणम् ५१-५७

मुहूर्तः ५८-६३

रोगचिन्तनम् ६४-६८

सङ्क्रन्तिविमर्शः ६९-७४

प्रश्नशास्त्रम् ७५-८३

उपनयनमुहूर्तः ८४-८९

कुजदोषविचारः ९०-९७

मलमासविचारः ९८-१०४

राजयोगः १०५-१२५

# प्रथम खण्डः
# ज्योतिषशास्त्रस्योत्पत्तिः विकासः च

## संरचना

१.१.प्रस्तावना

१.२.लक्षिताधिगमविशेषाः

१.३.ज्योतिषम्

१.४.ज्योतिषम् एकं वेदाङ्गत्वम्

१.५.स्कन्धविभागः

१.६.ज्योतिषशास्त्रप्रवर्तकाः

१.७.ज्योतिशास्त्रोत्पत्तिः

१.८.वैदिककालः

१.९.वेदाङ्गकालः

१.१०.सिद्धान्तकालः

१.११.आधुनिककालः

१.१२.वर्तमानकालः

१.१३.ज्योतिषशास्त्रस्य विकासः

१.१४.आदर्शप्रश्नाः

## १.१. प्रस्तावना

सृष्टेः मूलमन्त्रस्य भगवतो वेदस्य षडङ्गेषु ज्योतिषम् अन्यतमम्। अस्य ज्योतिषशास्त्रस्य उत्पत्तिः कथं वा जाता तथा च तस्य विकासः कीदृशः इति अयमंशः अवश्यं ज्ञातव्यः एव। 'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते' इत्युक्तरीत्या अस्य शास्त्रस्य उत्पत्तिः तस्य प्रयोजनं कीदृशमिति विचारः विचारणीयः। अत एव अस्मिन् भागे अस्य शास्त्रस्य उत्पत्तिः तथा वैदिककालिकज्योतिष, वेदाङ्गकालिकज्योतिषम्, सिद्धान्तकालः, वर्तमानकालः एवं कालक्रमेण विकासः कथं सम्भूतः इति जिज्ञासायाः समाधानमत्र प्रदत्तं वर्तते।

प्रियच्छात्राः --

शास्त्रेतिहासः किमर्थं पठनीयः इति प्रश्नः भवन्मनसि उदीयात्। इतिहासस्य

ज्ञानेन अस्माकं मनसि शास्त्रविषये आदरः इतोऽपि वर्धते। शास्त्रस्य प्रसिद्धग्रन्थानां ग्रन्थकर्तॄणां च परिचयेन अस्माकं मनसि कापि विशेषप्रेरणा जागर्ति, अस्माभिरपि शास्त्रम् आमूलाग्रमधीत्य किमपि नावीन्यं सम्पादनीयमिति प्रबलेच्छा मनसि उदेति, एतदर्थमेव आचार्यस्तरे अस्माभिः शास्त्रेतिहासः पठ्यते।

## १.२. लक्षिताधिगमविशेषाः

१) ज्योतिशास्त्रस्योत्पत्तिज्ञानम्।

२) विभिन्नकाले शास्त्रस्यास्य स्थितिः।

३) ज्योतिषशास्त्रस्य विकासपरम्परायाः ज्ञानम्।

४) वैदिककाले ज्योतिषस्यावश्यकता।

५) आधुनिककाले ज्योतिषस्य प्रासङ्गिकता।

## १.३. ज्योतिषम्

ज्योतींषि अधिकृत्य कृतं शास्त्रम् ज्योतिषमिति। ज्योतींषि अर्थात् ग्रहनक्षत्राणि। रव्यादयः नवग्रहाः। अश्विन्यादि सप्तविंशति नक्षत्राणि। अत्र गतिशीलाः ग्रहाः। अचलानि नक्षत्राणि इति ज्ञेयम्। वैदिककालादारभ्य

एव अस्य शास्त्रस्य महत्त्वम्, आदरः प्रयोजनं च आसीत्। वेदोक्त यज्ञादिकर्माणां कालनिर्णायकत्वेन ज्योतिषम् आसीत्। तस्मादेव अस्य कालविधानशास्त्रम् इति अपरं नाम। वेदस्य षडङ्गेषु अन्यततमम् ज्योतिषम् वेदस्य चक्षुरूपं चकास्ति।

कथ्यते हि वैदिकसंहितासु तत्र तत्रोपवर्णित ज्योतिषविषयमादाय लगधनाम्ना मुनिना प्रणीतः वेदाङ्गज्योतिषाख्यः ग्रन्थः विषयेऽस्मिन् प्रथम इति। ज्योतिषशास्त्रमिदं त्रिस्कन्धज्योतिशब्देनापि ज्ञायते।

तदिदं शास्त्रं व्यवहारशास्त्रत्वेनापि समाद्रियते जनैः। व्यवहारस्योपयोगः बहुमुखः। ग्रहाणां स्थितिः तथा गत्यादिनिर्देशेन कर्मसम्पादनिमित्तकमुहूर्तादिकथनेन शुभाऽशुभफलकथनेन च इदं शास्त्रम् प्रत्यक्षमेव उपकरोति।

शास्त्रदृष्ट्या व्यवहारदृष्ट्या च उपयोगित्त्वेनैव इदं शास्त्रम् वेदाङ्गेषु मूर्धन्यत्वेन स्मर्यते। यथोक्तं लगधमुनिना ---

**यथाशिखामयूराणां नागानां मणयो यथा।**

**तद्वद्वेदाङ्गशास्त्राणां ज्योतिषं मूर्ध्निस्थितम्।।**

## १.४. ज्योतिषम् एकं वेदाङ्गम्

यज्ञ, दान, तपः आदि कर्मणा परमपावनमोक्षप्राप्तिरेव वेदस्य परमलक्ष्यम्। उपर्युक्त यज्ञादिकर्मणां कालविधानं ज्योतिषशास्त्रमाधृत्य एव क्रियते। तस्मादेव वेदस्य षडङ्गेषु ज्योतिषम् अन्यतम्। उक्तञ्च ---

**वेदास्तावद्यज्ञकर्मप्रवृत्ताः यज्ञाः प्रोक्तास्तेतु कालाश्रयेण।**

**शास्त्रादस्मात् कालबोधो यतः स्याद्वेदाङ्गत्वं ज्योतिषस्योक्तमस्यात्।।**

व्याकरणम्, ज्योतिषम्, शिक्षा, निरुक्तम्, कल्पः, छन्दः एतानि वेदस्य षडङ्गानि। एतेषु षड्सु अङ्गेषु ज्योतिषं चक्षुरूपम् वर्तते। यथोक्तम् --

**वेदचक्षुः किलेदं स्मृतं ज्योतिषं मुख्यता चाङ्गमध्येऽस्य तेनोच्यते।**

## १.५. स्कन्धविभागः

वेदाङ्गरूपज्योतिषशास्त्रम् त्रिषु स्कन्धेषु विभक्तम्। सिद्धान्त (गणित), संहिता, होरा इति एते त्रयः स्कन्धाः। तस्मादेव अस्य त्रिस्कन्धज्योतिषशास्त्रम् इति अपरं नाम प्रसिद्धम्।

सिद्धान्तस्कन्धे ग्रहाणां गतिः, स्थितिः, ग्रहणं तथा तेषाम् उदयास्तविचारः, तथा च नक्षत्राणाम् उदयास्तविचारः एवं तेषां स्थूलसूक्ष्मरीतिश्च गणना गणितद्वारा क्रियते। तस्मादेव अस्य गणितस्कन्धः इत्यपि नाम वर्तते।

होरास्कन्धे ग्रहनक्षत्राणां स्थितिम् अनुसृत्य मानवजीवने तेषां शुभाशुभफलविचारः क्रियते। अस्य फलितज्योतिषम् इत्यपि व्यवहारः वर्तते।

संहितास्कन्धे ग्रहनक्षत्राणाम् आधारेण सामूहिकशुभाशुभघटनाः वर्ण्यन्ते। तथा च

अस्मिन् प्रत्येकस्य ग्रहस्य चाराः वर्णिताः वर्तन्ते। भूकम्पनम्, उल्कापातः, भूगर्भः, पर्जन्यगर्भादि विषयाः स्कन्धेऽस्मिन् अन्तर्भवन्ति।

## १.६. ज्योतिषशास्त्रप्रवर्तकाः

ज्योतिषं वेदस्य अङ्गत्वेन परिलक्ष्यते। तस्मात् वेदेषु एव तत्र तत्र ज्योतिषशास्त्रसम्बद्धविषयाः दृश्यन्ते। परन्तु कालक्रमेण अस्य शास्त्रस्य प्रवर्तनस्य परिवर्धनस्य च यशः सूर्यादि अष्टादश आचार्याणामेव। ते एव ज्योतिषशास्त्रस्य अष्टादशप्रवर्तकाः। यथा -- १) सूर्यः २) पितामहः ३) व्यासः ४) वसिष्ठः ५) अत्रि ६) पराशरः ७) कश्यपः ८) नारदः ९) गर्गः १०) मरीचिः ११) मनुः १२) अङ्गिराः १३) लोमशः १४) पौलिशः १५) च्यवनः १६) पवनः १७) भृगुः १८) शौनकः

## १.७.ज्योतिषशास्त्रस्योत्पत्तिः

ज्योतिषशास्त्रस्योत्पत्तिः ब्रह्मणा एव अभूदिति सर्वथा विश्वस्यते। ब्रह्मा हि पितामहोऽस्य जगतः यज्ञसाधननिमित्तं चतुर्थ्यो मुखेभ्यश्चतुर एव वेदान् प्रावोचत्। तेन एव वेदानां यज्ञात्मकत्वम्। ते च यज्ञाः कालाश्रयेणैव सिध्यन्ति इत्यस्मात् तत् सिध्यर्थं ब्रह्मा कालबोधकं ज्योतिषशास्त्रं विनिर्माय नारदाय प्रोवाच। नारदः शास्त्रस्यास्य महत्त्वमङ्गीकृत्य लोके प्रवर्तयामास। मतान्तरानुसारेण इदं शास्त्रं प्रथमं साक्षात् सूर्येण मयासुराय प्रोक्तमिति। ततः जगति प्रवृत्तम् इदं ज्योतिषशास्त्रम्।

एवं ज्योतिषशास्त्रस्योत्पत्तिः अभूदिति। तेन इदं स्पष्टं यत् वेदोक्तयज्ञादीनाम् अनुष्ठानार्थं कालनिर्णयार्थमेव अस्योत्पत्तिः जाता इति। तस्मादेव अस्य कालविधानशास्त्रमिति नामान्तरं विद्यते।

## १.८.वैदिककालः

कालेऽस्मिन् ज्योतिषशास्त्रान्तर्गताः विषयाः वेदेषु, उपनिषत्सु, स्मृतिषु अन्तर्भूताः आसन्। तत् तत् प्रसङ्गवशादेव अस्योच्चारणासीदिति श्रुतिवाक्यानि एव प्रमाणत्वेन गृह्यन्ते। वेदा हि नैव निश्चयेन ज्योतिषशास्त्रमुद्दिश्य प्रवृत्ताः। परन्तु सन्दर्भानुसारं ज्योतिषशास्त्रविषयाः नैके उद्धृताः वर्तन्ते।

वैदिककाले जनाः दिगवबोधाय ध्रुवादिनक्षत्राणां समयज्ञानाय रात्रौ नक्षत्राणां सहाय्यं गृह्णन्ति स्म। दिवा तु ते सूर्यगतिमधीत्य कुर्वन्ति स्म।

ऋग्वेदादौ युगावयवत्त्वेन संवत्सरादयो उल्लिखिताः। यथोक्तं वेदाङ्गज्योतिषे पाञ्चसंवत्सरं युगमिति तस्य बीजं वेदेषु दृश्यते। यथा हि --

**संवत्सरस्य तदहः परि ष्ठ वयन्मण्डूकाः पावृषीणं बभूव।**

वैदिकसाहित्ये न हि कुत्रापि स्पष्टतयोल्लिखितं यदयनपरिवर्तनं कदारभ्य भवतीति। तथा च संवत्सरः कदारभ्य प्रवर्तते इत्यपि नैव तत्र स्पष्टं प्रमाणम्। शतपथब्राह्मणे एतावदेव निर्दिष्टं यदुत्तरायणे वसन्तग्रीष्मवर्षर्तवो दक्षिणायने शरद्हेमन्तशिशिरर्तव इति। किन्तु वसन्तः कदारभ्य प्रवर्तते इति नैव स्पष्टम्।

तैत्तिरीयब्राह्मणानुसारेण उत्तराफल्गुनी हि संवत्सरस्य मुखं पूर्वा च पुच्छमिति। एतदनुसारेण फाल्गुनपौर्णमासीमभितः संवत्सरारम्भो अनुमितः। वराहमिहिराचार्यः स्मरति -

**आश्लेषार्द्धाद्दक्षिणमुत्तरमयनं रवेर्धनिष्ठाद्यम्।**

**नूनं कदाचिदासीद्येनोक्तं पूर्वशास्त्रेषु।।**

**साम्प्रतमयनं सवितुः कर्कटाद्यं मृगादितश्चान्यत्।**

## १.९.वेदाङ्गकालः

कालेऽस्मिन् लगधमुनिप्रणीत वेदाङ्गज्योतिषम् इत्याख्यस्य ग्रन्थस्य प्रचारः प्रसारः च आसीत्। अनेन इदं स्पष्टं जायते यत् वेदाङ्गकाले ज्योतिषस्य अध्ययनम् अध्यापनं च सुदृढम् आसीदिति। परन्तु लेखनपरम्परा नासीत् इति वेदाङ्गज्योतिषम् एव प्रमाणम्। यतः महान् विचारः संक्षिप्ततया एव दर्शितः अस्मिन् ग्रन्थे। वेदाध्ययिन वेदेन सह वेदाङ्गज्योतिषस्य श्लोकान् पठन्ति स्म। कालेऽस्मिन् अनेन ग्रन्थेन सह अन्ये ग्रन्थाः अपि अवश्यं स्युः परन्तु तस्योपलब्धिः उल्लेखश्च अद्यत्त्वे दुर्लभ एव।

## १.१०.सिद्धान्तकालः

कालेऽस्मिन् नैकैः विद्वद्भिः ज्योतिषस्य स्कन्धत्रयेषु योगदानं प्रदत्तं वर्तते।

अस्मिन् अध्ययन अध्यापनं च आसीत्। सिद्धान्तकाले अनेकैः दैवज्ञैः स्वीय स्वीय सिद्धान्तमण्डनं ग्रन्थाविष्कारद्वारा कृतम्। तस्मादेव अयं कालः सिद्धान्तकालः इति नाम्ना प्रसिद्धः। क्रि.पू.५०० आरभ्य १७ शतकपर्यन्तवर्तिकालः सिद्धान्तकालः।

आर्यभटः, लल्लः, वकराहमिहिरः, कल्याणवर्मा, ब्रह्मगुप्तः, भास्करः, श्रीपतिः, बल्लालसेनः एवम् अनेके दैवज्ञाः कालेऽस्मिन् प्रादुरभूवन्। तथा च तेषां ग्रन्था अपि अद्यत्त्वे समुपलभ्यन्ते। कालेऽस्मिन् आचार्यपरम्परा आसीदिति ग्रन्थानाम् अध्ययनेन स्पष्टं ज्ञायते। यतः तत् पूर्ववर्ति आचार्यकृतसिद्धान्तस्य खण्डनं कुत्रचित् मण्डनं वा ग्रन्थान्तरेषु उपलभ्यते। अनेन इदं स्पष्टं यत् अस्मिन् काले शस्त्रस्यास्य स्वरूपम् अत्यन्तं प्रकृष्टं सञ्जातमिति।

## १.११. आधुनिककालः

आधुनिककाले ज्योतिषशास्त्रस्य विकासः प्रचारः प्रसारः अत्यन्तं विस्तृततया शीघ्रं च जातः। यतः कालेऽस्मिन् नैके आचार्याः सञ्जाताः। अस्मिन् काले ज्योतिषशास्त्रस्य अध्ययनम् अध्यापनं च विद्यालयेषु, विश्वविद्यालयेषु च सुचारुरूपेण प्रचलदस्ति।

पूर्वाचार्यैः विरचित महत्त्वपूर्णग्रन्थानां टिप्पणीलेखनम् आधुनिककाले अत्यन्तं श्रद्धया सञ्जातमिति वक्तुं शक्यते। तथा च पाण्डुलिपीयुक्त ग्रन्थानां प्रकाशनं च सञ्जातम्। कालेऽस्मिन् कैरलिः, शकुनश्चेति द्वौ भेदौ संयोज्य सिद्धान्त, संहिता, होरा इति त्रिस्कन्धज्योतिषम् पञ्चस्कन्धज्योतिषम् इति केषाञ्चन ज्योतिर्विदाम् अभिप्रायः। परन्तु अस्य अङ्गीकारः सर्वैः नैव कृतः। अयं विचारः न सर्वैः आदृतः।

## १.१२.वर्तमानकालः

वर्तमानकाले ज्योतिषशास्त्रस्य अध्ययन अध्यापनं विभिन्न संस्कृतविद्यालयेषु विश्वविद्यालयेषु प्रचुरतया प्रचलदस्ति। तथा च विश्वविद्यालयेषु ज्योतिषविषयकशोधः, संगोष्ठयः, कार्यशालाः च अनुष्ठीयते। विश्वविद्यालयानुदान आयोगद्वारा ज्योतिषम् ऐच्छिकविषयत्त्वेन स्वीकर्तुम् अनुमतिः प्रदत्ता वर्तेत। कालेऽस्मिन् सिद्धान्तसंहिताहोरा इत्येवं त्रिस्कन्धेषु च अध्ययनं प्रचलदस्ति। परन्तु होराविषयकविचाराःअधिकप्रायोगिकाः दृश्यन्ते। संहिता एवं सिद्धान्ते प्रायोगिक कार्यम् अधिक नैव प्रचलति।

## १.१३.ज्योतिषशास्त्रस्य विकासः

ज्योतिषशास्त्रमपि शास्त्रान्तरवत्कतिपय अवस्थाः अतिक्रम्य सम्प्रतिकावस्थां प्राप्तुं दृश्यते। जिज्ञासा हि मानवस्य मौलिकप्रवृत्तिष्वन्यतमा। जिज्ञासैव ज्ञानस्याविष्कारिणी। ग्रहनक्षत्रविषयकजिज्ञासैव ज्योतिषशास्त्रस्याविर्भावे विकासे च हेतुः। मानवाः अनादिकालादेव दिवस-रात्रि अयनादिविषये चिन्तनतत्पराः आसन्। तेन हि ज्योतिषशास्त्रस्य विकासः पञ्चसु अवस्थासु विभक्तो दृश्यते।

**१) प्राग्वैदिककालः**

**२) वैदिकसंहिताकालः**

**३) वेदाङ्गकालः**

**४) सिद्धान्तकालः**

**५) आधुनिककालः / वर्तमानकालः**

वैदिकसंहितासु यादृशं ज्योतिषस्य स्वरूपं दृष्टुं लभ्यते तदाधारेण वयमनुमातुं प्रभवामः यत् पूर्वमपि ज्योतिषस्य यत्किञ्चिदपि स्वरूपं सुनिश्चितमासीदिति। वैदिककालः तु ऋग्वेदकालादारभ्य लगधकालपर्यन्तं प्राचलत्। यद्यपि वेदानामपौरुषेयत्वात् अनादिनिधनत्त्वं सर्वैः स्वीक्रियते तथैव अत्रापि। लगधस्य वेदाङ्गज्योतिषमारभ्य पूर्वमध्यमकालस्योदयः जातः। ज्योतिषस्य पूर्वमध्यकालः तावत् वेदाङ्गज्योतिषादारभ्य आर्यभटीयाविर्भावं यावत्। सिद्धान्तानां स्थिरीकरणं पञ्चाङ्गाविर्भावः च कालस्यास्य वैशिष्ट्यानि। ज्योतिषस्य त्रिषु स्कन्धेषु वर्गीकरणञ्च अत्रैव स्पष्टतया निर्दिष्टम्। आर्यभटस्य आर्यभटीयमारभ्य कमलाकरस्य सिद्धान्ततत्त्वविवेकपर्यन्तं कालस्यास्य उत्तरार्धम्। अस्मिन्नेवकाले आर्यभट-ब्रह्मगुप्य-वराहमिहिर-भास्कराचार्य - कमलाकरभट्टः इत्यादयः ख्यातयशस्काः ज्योतिर्विदः सञ्जाताः.

तस्मात् उदेति आधुनिककालः। चापीयत्रिकोणगणितकारः नीलाम्बरः, सरलत्रिकोणमितेः प्रणेता बापूदेवः, गणकतरङ्गिणी प्रभृतिग्रन्थानां प्रणेता सुधाकरः इत्यादयः कालस्यास्य लब्धप्रतिष्ठा ज्योतिर्विदः।

कमलाकरभट्टपर्यन्तमपि आर्यभटीया प्राचीनारीतिरेवानुसृता दृश्यते। वराहमिहिरो ज्योतिषे यावनप्रभावं स्वीकरोति। अनेन त्रिषुस्कन्धेष्वपि स्वीयग्रन्थाः रचिताः यथा सिद्धान्ते पञ्चसिद्धान्तिका, होरायां बृहज्जातकम्, संहितायां बृहत्संहिता च।

उत्तरमध्यकाले यावनगणकैः सह भारतीयगणकानां सम्मेलनेन ज्योतिषशास्त्रे नवीनता प्रविष्टा। ताजिकं हि तेषामेव प्रभावफलमत्र। नीलाम्बरादारभ्य आङ्ग्लसम्पर्केण गणिते नवीना परिपाटी प्रविष्टा। ततः प्रभृति एव सामुद्रिकमपि आगतं वर्तते।

एवं ज्योतिषशास्त्रं वेदकाले कालविधानत्वेन आसीत् तदद्य कालविधानशास्त्रम् एवं व्यवहारशास्त्रमपि सञ्जातम्। यदा मानवजीवने ग्रहाणां प्रभावः तेन उत्पद्यमान शुभाशुभफलज्ञानं ज्योतिषशास्त्रेणैव ज्ञेयम्। तस्मात् इदं ज्योतिषशास्त्रम् आधुनिककाले व्यवहारशास्त्रमपि प्रसिद्धम्। एवं ज्योतिषशास्त्रस्य विकासः क्रमेण वर्णितोऽत्र।

## १.१४. आदर्शप्रश्नाः

१. ज्योतिःशास्त्रमधिकृत्य लघुनिबन्धं विलिखत।

२. ज्योतिःशास्त्रस्य विकासक्रमं विवृणुत।

३. ज्योतिषस्य वेदाङ्गत्वं लिखत।

४. वैदिककाले ज्योतिषम्

## स्वावलोकनप्रश्नाः

१. सिद्धान्तकालं विवृणुत ?

२. आधुनिककाले ज्योतिषम् ?

# द्वितीयखण्डः
# ज्योतिषस्य होरास्कन्धः

## संरचना

२.१.प्रस्तावना

२.२.लक्षिताधिगमविशेषाः

२.३. जातकशास्त्रम्

२.४. आदर्शप्रश्नाः

## २.१. प्रस्तावना

प्रियच्छात्राः

ज्योतिःशास्त्रमिदं विभिन्नैः लोकोपकारकैर्विषयैः संपृक्तं विद्यते। शास्त्रेऽस्मिन् सिद्धान्त-संहिता-होरेति स्कन्धत्रयं विद्यते। अस्मिन्नध्याये स्कन्धत्रये अन्यतमस्य होरास्कन्धस्य विमर्शनं क्रियते।

## २.२. लक्षिताधिगमविशेषाः

अस्य अध्यायस्य अध्ययनेन अधो निर्दिष्टान् विषयान् भवन्तः ज्ञास्यन्ति।

१) होरापदस्य निर्वचनम्

२) होराशास्त्रस्य वैशिष्ट्यम्

३) जातकशास्त्रम्

४) कतिपयहोराग्रन्थास्तत्प्रणेतारश्च

त्रिस्कन्धात्मके ज्योतिषशास्त्रे होरास्कन्धः विशिष्टं स्थानं भजते। यत्र ग्रहस्थितिः, तिथिनक्षत्रादिद्वारा मनुष्यस्य शुभाशुभत्त्वं निर्णीयते तदेव होराशास्त्र-मित्युच्यते। होराशब्दो हि अहोरात्रशब्दस्य आद्यन्ताक्षरलोपेन निष्पन्नः इति विदुषां मतिः। यथोक्तं पराशरहोराशास्त्रे -

**"अहोरात्र पूर्वन्त्यलोपाद्दोराऽवशिष्यते।"**

बृहज्जातके –

**“होरेत्यहोरात्रविकल्पमेके वाञ्छति पूर्वापरवर्णलोपात्।”**

मेषादिद्वादशराशिषु रव्यादिग्रहाणां स्थितिवशात् यत् शुभाशुभफलमुत्पद्यते तस्य आमूलाग्रविवरणमेव होरास्कन्धे विद्यमानविषयः। यत्र च जातस्य जननकालिकग्रहस्थितिमनुसृत्य भूतवर्तमानवर्तिष्यमाणादेशाः कीर्त्यन्ते तज्जातकम्। तस्मादेव अस्य जातकशास्त्रमिति नाम।

**यदुपचितमन्यजन्मनि तस्य कर्मणः पङ्क्तिम्।**
**व्यञ्जयति शास्त्रमेतत् तमसि द्रव्याणि दीप इव।।**

अर्थात् अन्यजन्मनि जन्मजन्मान्तरेषु वा कृतस्य कर्मणः प्रभावः इहजन्मनि जायते इति तस्य निर्देशः होराशास्त्रेण क्रियते । जन्मसमये ग्रहाणां स्थितिः यथा कुण्डल्यां निर्दिश्यते तेन यत् शुभाशुभत्वं द्योतते तदेव तज्जातकमिति। जातमेव जातकमुत्पन्नम्।

ग्रहा हि पूर्वजन्मकर्मार्जितं शुभाशुभफलं व्यञ्जयन्तीत्येतस्य कथनस्य अयमेवाशयः यत् यादृक् सञ्चित कर्म तदनुगुणम् अनुकूले प्रतिकूले वा समये जन्म प्राप्नोति। ग्रहनक्षत्राण्यपि तथैव यथायोगानुकूलानि प्रतिकूलानि वा भूत्वा शुभाऽशुभं वा प्रकटयन्ति। तत् ज्ञानम् येन प्राप्यते तदेव होराशास्त्रम्। शुभाशुभज्ञानानन्तरं जपतपदानहोमशान्त्यादि विधिविधानैः अशुभं परिहर्तुं प्रभवेदिति फलदेशस्य महत्त्वम्। यस्य जन्मनि यो ग्रहः प्रबलः तदा तज्जातकः तत्समानप्रकृतिको जायते। होराशास्त्रस्यावश्यकता प्रतिदिनं प्रतिक्षणं च वर्तते। यथोक्तम् --

**अर्थार्जने सहायः पुरुषाणामपदर्णवे पोतः।**
**यात्रासमये मन्त्री जातकमपहायनास्त्यपरः।।** इति।

एतादृश होराशास्त्रम् मानवजीवने अत्यन्तं प्रभावं जनयति। यतो हि मानवः सामाजिकप्राणी। समाजे मानवः स्वीय प्रतिष्ठाम् आदरं च प्राप्तुं यतते। सुखं मे भूयात् दुःखं मे मनागपि मा भूत् इत्युक्त्यनुसारं मानवेन क्रियमाण दैनन्दिनकर्मणः शुभफलं एव इष्यते। परन्तु शुभाशुभत्वनिर्णयस्तु कालाधीनः। अस्य शुभाशुभत्वस्य ज्ञापनं होराशास्त्रद्वारा सम्भवति।

ज्योतिर्विद्भिः होराशास्त्रं पञ्चधा विभक्तमस्ति। जातकं, ताजिकं, रमलम्, प्रश्नः, स्वप्नश्चेति। एतेषु जातकमेव प्रधानम्। यतः ग्रहस्थितिवशादत्र शुभाशुभत्ववर्णयः क्रियते। यतः होराशास्त्रम् जातकशब्देनाप्युच्यते। यथाह कल्याणवर्मा --

**जातकमिति प्रसिद्धं यल्लोके तदिहकीर्त्यते होरा।**

**अथवा दैवविमर्शनपर्यायः खल्वयं शब्दः।।** इति।

यत्र यत्र ग्रहस्थितितिथिवारनक्षत्रादीनाधारीकृत्य फलादेशः क्रियते तज्जातकमिति। यत्र गोचरमाधारीकृत्य फलादेशः क्रियते तत्ताजिकमिति। यत्र च प्रस्तरद्वारा शुभाशुभफलं कथ्यते तद्रमलशास्त्रम्। यत्र प्रश्नलग्नमाश्रित्य फलादेशः क्रियते तत्प्रश्नशास्त्रम्। स्वप्नविवेचनेन शुभाशुभफलनिरूपकं तत् स्वप्नशास्त्रम्।

उपर्युक्त पञ्चविभागेष्वपि राश्यादयः, ग्रहस्थितिः, नक्षत्राणि इत्येवं विषयक मतभेदाः न सन्ति। परन्तु शुभाशुभफलकथनविचारे क्रमः एव भिद्यते। न फलं न स्रोतश्च। तस्मादेव उक्तम् यत् होराशास्त्रम् अत्यन्तं गभीरं सूक्ष्ममत्या विवेचनीयमिति।

## २.३.जातकशास्त्रम्

यत्र हि जन्मकालिकग्रहाद्यवस्थितमाधारीकृत्य जातस्य भूतवर्तमानभविष्य शुभाशुभफलादेशः क्रियते तज्जातकशास्त्रम्। मानवस्योपरि अतिदूरे विद्यमानानां ग्रहाणां प्रभावः कथमिति प्रश्नः उदेति। परन्तु मानवजीवने ग्रहाणां प्रभावः अस्त्येव। यथोक्तम् -

**"ग्रहैर्व्याप्तमिदं सर्वं त्रैलोक्यं सचराचरमिति।"**

सूक्ष्मावलोकनेन एतत् स्पष्टं जायते यद्यत्प्रकृतिको ग्रहः यस्य जातके बलिष्ट सा एव प्रकृतिः तज्जातकस्यापि। रव्यादिनवग्रहाणां मेषादिद्वादशराशिषु अहर्निशम् अनवरतं सञ्चारः दृश्यते। मेषादिद्वादशराशयाश्च एकस्मिन् दिने एकं भगणं पूरयन्ति। तस्मादेव द्वादशराशयः उदयं प्राप्नुवन्ति। राशेः उदय एव लग्नमित्युच्यते। अर्थात् जन्मकाले राशिचक्रस्य यो भागः पूर्वक्षितिजे उदेति तदेव राश्यादिकं लग्नमिति। मेषराशौ जातः अवश्यं जलात् बिभेत्येव। यतः मेषराशेः स्वामी भौमः स च वह्निप्रकृतिको जलविमुखः। एवं सिंहस्य स्वामी सूर्यः। तद्राशौ जातः निश्चयमेव अल्पवाचश्च पित्तप्रकृतिको भवति।

यदि योगान्तरवशाद् केषुचित् स्वल्पानि लक्षणानि स्युः। परं जन्मराशिप्रभावः शरीरे अवश्यं दृश्यते एव।

गगने हि यानि नक्षत्राणि दृग्गोचराणि जायन्ते तानि सर्वाणि समप्रकृतिवद्भासन्ते। परं नक्षत्रेषु आभ्यन्तरं महदन्तरं वर्तते। यथा तेषु नक्षत्रेषु स्थूल कृशा प्रखरज्योतिर्मय-स्वल्पज्योतिर्मयम् एवं नैके भेदाः उत्पद्यन्ते। तेन नक्षत्रवशात् च शुभाशुभफलविचारः विचार्यते।

जातकशास्त्रे शुभाशुभफलनिर्णयः जातस्य जन्मकालिकग्रहस्थितमनुसृत्य क्रियते। रव्यादयः ग्रहाः द्वादशराशिषु सञ्चरन्तः वर्तन्ते। मेषादयः द्वादशराशयः। तदेव राशिचक्रमित्युच्यते। नक्षत्राणां समूहः राशिः। अश्विन्यादि २७ नक्षत्राणि। प्रत्येकस्मिन् राशौ नक्षत्राणां नव पादाः अन्तर्भवन्ति। नक्षत्राणां सन्ति प्रत्येकं स्वप्रकृतिनिरूपका देवताः। राशीनामपि स्वामिनः रव्यादयः ग्रहाः। तथा च ग्रहाणामपि उच्चस्थानम्, नीचस्थानम्, केन्द्रस्थानम्, त्रिकोणमिति स्थानविशेषाः विद्यन्ते। अपि च ग्रहाणां परस्परं शत्रमित्रत्त्वं, दृष्टिः तेषां स्वीयं कारकत्त्वं च विद्यते। इमे समेप्यंशाः शुभाशुभफलनिर्णयप्रसङ्गे चिन्त्यते।

जातकस्य जन्मसमये यः राशिः पूर्वस्मिन् क्षितिजे भवति तदेव लग्नमिति। तस्मात् द्वादशराशयः द्वादशभावत्वेनोच्यन्ते। जन्मकाले कः ग्रहः कस्मिन् राशौ विद्यते इति ज्ञात्वा कुण्डली निर्मीयते। अस्य एव जन्मकुण्डली इति नाम।

जन्मकुण्डल्यां लग्नात् द्वादशभावाः इत्युक्तम्। कुण्डल्यां लग्नं तनुभावः, द्वितीयं धनभावः, सहजः सुखसुतादि द्वादशभावाः फलादेशसन्दर्भे चिन्त्यन्ते।

राशिभावोदयास्तबालतरुणवृद्धत्वादिवशादेव ग्रहाः शुभाशुभफलं सूचयन्ति। यद्यपि फलादेशविषये दैवज्ञाः वैमत्यं भजन्ते तथापि तद्विषयकसिद्धान्तेषु तेषामैकमत्यमेव।

अत्र कतिपयहोराग्रन्थाः तेषां कर्तारश्च --

| | | |
|---|---|---|
| बृहत्पराशरहोराशास्त्रम् | - | पराशरः |
| बृहज्जातकम् | - | वराहमिहिरः |

| | | |
|---|---|---|
| जैमिनिसूत्रम् | - | जैमिनि |
| फलदीपिका | - | मन्त्रेश्वरः |
| जातकपारिजातः | - | वैद्यनाथः |
| सारावली | - | कल्याणवर्मा |
| जातकालङ्कारः | - | गणेशदैवज्ञः |
| भावकुतूहलम् | - | जीवनाथः |

## २.४. आदर्शप्रश्नाः

१) होरास्कन्धमधिकृत्य लघुनिबन्धं विलिखत।

२) जातकशास्त्रस्य वैशिष्ट्यं विशदयत।

## स्वावलोकनप्रश्नाः

१. होराशब्दस्य निष्पत्तिं विलिखत ?

२. होरास्कन्धस्य प्रसिद्धग्रन्थानां तत्प्रणेतॄणां च नामानि विलिखत ?

# तृतीयखण्डः
# ज्योतिषस्य संहितास्कन्धः

## संरचना


३.१. प्रस्तावना

३.२. लक्षिताधिगमविशेषाः

३.३. नारदसंहिता

३.४. बृहत्संहिता - वराहमिहिरः

३.५. अद्भुतसागरः

३.६. आदर्शप्रश्नाः


## ३.१. प्रस्तावना

प्राचीनभारतीयशास्त्रेषु न केवलं मानवस्य आध्यात्मिकविकासार्थमपि च भौतिकविकासार्थमपि आवश्यकाः विचाराः प्रतिपादिताः। ज्योतिःशास्त्रस्य संहितास्कन्धार्तर्गतानां ग्रन्थानामध्ययनेन विषयोऽयं स्फुटं ज्ञातो भवति। संहितास्कन्धे प्रायः ज्योतिःशास्त्रस्य सर्वेऽपि विषयाः तत्र तत्र सूत्ररूपेण प्रतिपादिताः। मानवस्य दैनिकजीवनेन सम्बद्धाः बहवो विचाराः संहिताग्रन्थेषु प्रतिपाद्यन्ते। बहूनां वैज्ञानिकतत्वानामपि समुल्लेखः संहिताग्रन्थेषु दरीदृश्यते। अध्यायेऽस्मिन् संहितास्कन्धस्य महत्त्वं तदन्तर्गत विशेषाश्च प्रतिपाद्यन्ते।

## ३.२. लक्षिताधिगमविशेषाः

अस्य अध्यायस्य अध्ययनेन अधो निर्दिष्टान् विषयान् भवान् ज्ञास्यन्ति।

१) संहितास्कन्धस्य विषयाः

२) नारदसंहिता

३) अद्भुतसागरस्य परिचयः

ज्योतिषशास्त्रं सिद्धान्त संहिता होरा इति त्रिषुस्कन्धेषु विभक्तम्। ग्रहाणां सामूहिकप्रभावो येन ज्ञायते स संहितास्कन्धः सार्वत्रिकविषयः। सिद्धान्तहोरयोरेकत्रवर्णनमेव

संहितेति। वराहमिहिरेणोक्तं यथा --

**ज्योतिःशास्त्रमनेकभेदविषयं स्कन्धत्रयाधिष्ठितम्।**

**तत्कार्त्स्न्योपनयस्य नाम मुनिभिः सङ्कीर्यते संहिता।।** इति।

संहिताभागः सार्वभौमविषयः। तथा च संहिता भागः सिद्धान्तभागादपि प्राचीनतरः। अस्य हि पर्याप्ता सामग्री वैदिकसंहितायां वैदिकसाहित्ये च समुपलभ्यते। संहिताभागादेव सिद्धान्तः पृथक् कृतः। यद्यपि पश्चाद्वर्तिकाले संहिताभागे मुहूर्तविषयाः एव अवशिष्टाः तथापि नेदमस्य यथार्थरूपम्।

सामान्यतः संहिताशास्त्रे सूर्यादीनां विशेषेण नक्षत्राणां सहोदयेन प्राणिषु कीदृशः प्रभावः, ग्रहकृतपरिवर्तनं वर्षादियोगाश्च निरूपिताः विषयाः। दकार्गलम्, भूगर्भपर्जन्यगर्भादिलक्षणानि चात्र निरूपितानि वर्तन्ते।

सम्प्रति नारदसंहिता, पाराशरसंहिता, गर्गसंहिता, भृगुसंहिता, काश्यपसंहिता, वसिष्ठसंहिता बृहत्संहिता च पूर्ववर्त्तित्वेन समुपलभ्यन्ते ग्रन्थत्वेन।

## ३.३. नारदसंहिता

संहितास्कन्धस्य मूलस्रोतत्त्वेन नारदसंहिता ग्रन्थः आश्रियते। पञ्चदशाध्यायेषु ग्रन्थोऽयं विभक्तः। ग्रन्थेऽस्मिन् ज्योतिषशास्त्रस्य स्कन्धविभागः, शास्त्रस्य वेदाङ्गत्वनिरूपणम्, जगतः शुभाशुभत्त्वनिरूपणं च निरूपितम् वर्तते। ततः क्रमेण सूर्यादिनवग्रहचाराः कथिताः। ब्रह्मदैवमानुषपित्र्यसौरसावनचान्द्रनाक्षत्रबार्हस्पत्यादि नवविधकालमाननिरूपणं च अत्र विद्यते। तथा च ग्रहणं सौरमानतः, गर्भादिकं सावनतः, वर्षादिकं नाक्षत्रमानतः, व्रतपर्वादिकं चान्द्रमानतः, प्रभवादि वर्षनिरूपणं गुरुमानेन कृतं वर्तते।

ग्नन्थेऽस्मिन् प्रभवादि षष्ठिसंवत्सराणां नामान्युक्तानि। तत्रोक्तं यत् पञ्चभिवर्षैः युगं भवति। द्वादशयुगानि च। युगेश्वराः विष्णुवाद्याः उक्ताः। तथा च संवत्सरफलमपि निरूपितमत्र।

अत्र मृगादितः उत्तरायणं कर्कादितः दक्षिणायनमुक्तम्। शिशिराद्याः ऋतवः चैत्राद्याः मासाः, शुक्लकृष्णौपक्षाविति। ग्रन्थेऽस्मिन् तिथिविचारः प्रोक्तः यत्र तिथिदेवतास्तिथिकृत्यं

युगादितिथयश्च प्रोक्ताः। तथा च वासरविचारः, नक्षत्रविवरणम्, योगविचारः, करणविचारः, मुहूर्तविवरणम्, गोचरफलविश्लेषणादि विचाराः विस्तृततया निरूपिताः वर्तन्ते।

## ३.४. बृहत्संहिता - वराहमिहिरः

वराहमिहिराचार्येण प्रणीतः बृहत्संहिताख्यः ग्रन्थः संहितास्कन्धस्य मेरुग्रन्थत्वेन समाद्रियते। षडोत्तरशताध्यायाः ग्रन्थेऽस्मिन् वर्तन्ते। तस्मात् हि अयं ग्रन्थः बृहत्संहिता इति नाम्ना सार्थकतामेति।

आचार्य वराहमिहिरः आवन्तिकादेशे ४१२ तमे शकासन्नकाले जनिमलभत। अस्य जनकः आदित्यदासः। स एव गुरुरप्यासीदित्याचार्योक्तपरिचयश्लोकेन स्पष्टम्। यथा –

**दिनकरवशिष्ठपूर्वान् विविधमुनीन् भवतः प्रणम्यादौ।**

**जनकं गुरुञ्च शास्त्रे येनास्मिन् नः कृतो बोधः।।**

वराहमिहिराचार्येण ज्योतिषस्य त्रिषु अपि स्कन्धेषु ग्रन्थाः प्रणीताः। संहितास्कन्धे आचार्यविरचित बृहत्संहिताग्रन्थ एव आद्यः पौरुषग्रन्थः। बृहत्संहितातः पूर्वं तु वयमनुमातुमेव प्रभवामः यत् संहितास्कन्धस्यपद्धतिः कथमासीत् इति। ग्रन्थेऽस्मिन् संहिताभागस्य स्पष्टता विद्यते।

बृहत्संहितायां वराहमिहिराचार्येण नैके विषयाः प्रतिपादिताः। यथा ज्योतिषशास्त्रस्वरूपम्, स्कन्धत्रयविभागः, सांवत्सरसूत्रम्, दैवज्ञलक्षणानि, संहितापदार्थाः, ग्रहाणां चाराः, गर्भलक्षणम् इत्यादि अनेके विचाराः स्पष्टतया निर्दिष्टाः वर्तन्ते।

बृहत्संहितायां वराहमिहिराचार्येण संहितापदार्थाः उक्ताः वर्तन्ते। यथा –– दिनकरादीनां ग्रहाणां चारास्तेषु च तेषां प्रकृतिविकृति ...... फलानि भवन्ति। अर्थात् रविचन्द्रकुजबुध-गुरुशुक्रशनिराहुकेतूनां ग्रहाणां चाराः वर्णिताः। तेषां ग्रहाणां गतिवशेन शुभाशुभकथनम्। तेषु चारेषु ग्रहाणां प्रकृतिः, विकृतिः, वर्णः, किरणम्, कान्तिः, संस्थानानि, ऊर्ध्वगामित्त्वम्, वक्रगामित्त्वम्, नक्षत्रैः सहसंयोगः युतिः इत्यादि लक्षणानि प्रतिपादितानि वर्तन्ते। तथा च नक्षत्रकूर्मविभागे सप्तविंशतिनक्षत्राणां नवधाविभक्ति नक्षत्रत्रयेण देशेषु फलानि उल्लिखितानि सप्तर्षीणां चारोऽपि वर्णितः। तथा च ताराग्रहाणां कुज-बुध-गुरु-शुक्र-शनीनां शृङ्गाटकादिसंस्थानैः शुभाशुभज्ञानम्। एतेषां ग्रहाणां युतिः अर्थात् ग्रहयुद्धम् तेन

जायमानपरिणामोपि उक्तः। ताराग्रहाणां सूर्येण सह युतिः अस्तमनमिति। ताराग्रहाणां चन्द्रेण सह युतिः समागमश्चेति।

तथा परिधेः प्रतिसूर्यस्य च लक्षणम्, पवनस्य वायोरुल्कापातादि लक्षणानि, क्षितिचलनम्, भूकम्पः, इन्द्रचापस्येन्द्रधनुषो लक्षणम्, वास्तुविद्या, वातचक्रलक्षणम्, वृक्षायुर्वेदः, जलोपलब्धिः, पक्षिणाम् लक्षणम्, पुरुष-स्त्रीलक्षणानि, दीपलक्षणम्, पिटकानां दण्डानां यष्टीनां च लक्षणानि एवं नैके विषयाः संहितापदार्थे अन्तर्गताः वर्तन्ते।

वराहमिहिराचार्यकाले संहितापदार्थाः विशेषतो लोके प्रचलिता आसन्। आचार्येण स्वयं बृहत्संहितायां उक्तम्। यथा --

**प्रथममुनिकथितमवितथमवलोक्य ग्रन्थविस्तरस्यार्थम्।**

**नाति लघु विपुलं रचनाभिरुद्यतः स्पष्टमभिधातुम्।।** इति।

अतः इयं बृहत्संहिता पूर्वप्रचलितविषयानेव सारल्येन संक्षेपेण च प्रकटयति। अस्या प्राक्काले गर्गसंहिता, काश्यपसंहिता, नारदसंहितेत्यादिसंहिता आर्षाः आसन्।

एतत्तु सत्यमेव यज्जातकशास्त्रस्य परम्पराप्रवर्तकः वराहमिहिराचार्य एव प्रथम आचार्यः इति। एतदपि वक्तुमुचितं यत् वराहमिहिरादन्यः कोऽपि आचार्यः त्रिस्कन्धज्योतिर्विद्याकुशलो नासीदिति। अतः ज्योतिषशास्त्रस्य आचार्येषु अयं सुप्रसिद्धः।

## ३.५. अद्भुतसागरः

वस्तुतः अद्भुतसागरः इत्ययं संहिताग्रन्थः अद्भुत एव। ग्रन्थोऽयं लक्ष्मणसेनेन प्रारब्धः तत्तनयेन बल्लालसेनेन पूरितः १०८९ तमे वर्षे। सन्त्यत्र बहवो विषयाः, ये खलु अन्तरिक्षभूमीराश्रित्य बहवः अद्भुताः उत्पाताः च वर्णिताः। सूर्यादिग्रहाणाम् आवर्ताः, ग्रहयुद्धाद्भुतवर्ताः, आकृत्यादियोगाः, रव्यादिपर्वाद्भुतवर्ताः इत्यादिविषयाः सप्रपञ्चं वर्णिताः।

अन्तरिक्षश्रयाद्भुतवर्णनप्रसङ्गे प्रतिसूर्यपरिवेषेन्द्रधनु - रश्मिदण्ड - गन्धर्वनगर - निर्यात - सन्ध्या - सन्ध्याकालिककिरणविकरण - दिग्दाह - छाया - तमोधूमनीहारोल्का - विद्युद् - वात - मेघ- मेघगर्भ - प्रवर्षणातिवृष्टि - कबन्धाद्भुतावर्ताः साङ्गोपाङ्गं प्रपञ्चिताः।

भौमौश्रये तु भूकम्पः - जलाशयाग्नि - दीपदेवप्रतिमा - शक्रध्वज - वृक्ष - ग्रह - वातजोपस्कर - वस्त्रोपान - हासन - शस्त्र - पुरा - दिव्यस्त्रीपुरुषदर्शन - मानुष - पिटका - स्वप्न - कायरिष्ट - दन्तिजन्मप्रसव - सर्वशाकुन - नानामृगविहग - गजाश्व - वृषमहिष - बिडाल - शकुन - शृगाल - गृहगोधिक - मक्षिका - सद्योवर्षनिमित्ताद्भुतवर्ताः पाकसमयाद्भुताकर्ताश्च निरूपिताः।

ग्रन्थोऽयम् अद्भुतो यथा --

**अभूतपूर्वं यत्पूर्वं यत्पूर्वं जातयेऽन्यथा।**

**तदद्भूतमिति प्रोक्तं नैमित्तं स्यान्निमित्तजम्।।**

अर्थात् अभूतपूर्वं यल्लोकस्य पूर्वं भवति तदद्भूतम्। तच्च नैमित्तानैमित्तभेदेन द्विविधम्। तदुभयमपि द्विविधम् शुभसूचकमशुभसूचकञ्च। ग्रन्थेऽस्मिन् अयनचलनविषये एवमुक्तम्, यथा --

**सकलवसुधाधिनाथश्रीमद्बल्लालसिंहदेवेन।**

**अयनद्वयं यथा तत्परीक्ष्य संलिख्यते सवितुः।।**

**इदानीं तद्विसंवादादयनं दक्षिणं रवेः।**

**भवेत् पुनर्वसोरादौ विश्वादुत्तरायणम्।।** इति।

एवं संहितास्कन्धसम्बन्धी अद्भुतसागराख्यो ग्रन्थः अद्भुत एव।

श्रीपत्याख्येन विदुषा रत्नमाला इति संहिताग्रन्थः प्रणीतः। संहितास्कन्धे अस्यापि योगदानं श्लाघनीयमेव। ९६४ शकाब्दे भोजेन राजमार्तण्डः इति नामा संहिताग्रन्थः रचितः। अयमपि ग्रन्थः विद्वद्भिः बहुधा श्लाघ्यते।

## ३.६. आदर्शप्रश्नाः

१. संहितास्कन्धमधिकृत्य निबन्धमेकं विरचयत।

२. वराहमिहिरस्य बृहत्संहितामधिकृत्य टिप्पणीं विलिखत।

## स्वावलोकनप्रश्नाः

१. अद्भुतसागरग्रन्थस्य वैशिष्ट्यं प्रतिपादयत ?

२. नारदसंहितायां विशेषं प्रकटयत ?

# चतुर्थः खण्डः

# ज्योतिषस्य सिद्धान्तस्कन्धः

## संरचना

४.१. प्रस्तावना

४.२. लक्षिताधिगमविशेषाः

४.३. सिद्धान्तस्कन्धस्य स्वरूपम्

४.४. पितामहसिद्धान्तः

४.५. पञ्चसिद्धान्ताः

४.६. वासिष्ठसिद्धान्तः

४.७.रोमकसिद्धान्तः ४.८.पौलिषसिद्धान्तः

४.९.सूर्यसिद्धान्तः ४.१०. आधुनिकसूर्यसिद्धान्तः

४.११. वराहमिहिरः पञ्चसिद्धान्तिका च

४.१२. ब्रह्मगुप्तः ब्रह्मस्फुटसिद्धान्तश्च

४.१३. खण्डखाद्यकरणम्

४.१४. मुञ्जालः - बृहन्मानसं लघुमानसञ्च

४.१५. द्वितीय आर्यभटः महासिद्धान्ताश्च

४.१६.भट्टोत्पलः

४.१७. श्रीपतिः - सिद्धान्तशेखरः, धीकोटिदकरणम्

४.१८.भास्कराचार्यः - सिद्धान्तशिरोमणिः, करणकुतूहलम्

४.१९.गणेशः - ग्रहलाघवम्

४.२०.मुनीश्वरः सिद्धान्तसार्वभौमः

४.२१.कमलाकरः - सिद्धान्ततत्त्वविवेकः

४.२२. आदर्शप्रश्नाः

## ४.१. प्रस्तावना

प्रियच्छात्राः

ज्योतिश्शास्त्रे जन्मकालिकग्रहस्थित्यनुरोधेन शुभाशुभफलानि समादिश्यन्ते। जन्मकाले इष्टकाले वा सूर्यादिग्रहाणां स्थितिज्ञानं परमावश्यकम्। यत्र स्कन्धे ग्रहानयनप्रकारः प्रतिपाद्यते सः स्कन्धः सिद्धान्तस्कन्धः। विभिन्नानि कालमानानि, त्रुट्यादिकालावयवाः, सूर्यचन्द्रग्रहणं, चन्द्रशृङ्गोन्नतिः, ग्रहाणामुदयास्तमनम्, अधिमासक्षयमासौ, पञ्चाङ्गनिर्माणम् इत्यादयः विचाराः सिद्धान्तग्रन्थेषु प्रतिपाद्यन्ते। अस्मिन्नध्याये सिद्धान्तस्कन्धस्य वैशिष्ट्यमत्र प्रस्तूयते।

## ४.२. लक्षिताधिगमविशेषाः

अस्य अध्यायस्य पठनेन भवन्तः अधोनिर्दिष्टान् विषयान् अवगन्तुं प्रभवन्ति।

१) सिद्धान्तस्कन्धस्य स्वरूपम्

२) पञ्चसिद्धान्ताः                ३) ब्रह्मस्फुटसिद्धान्तः

४) केषाञ्चन प्रसिद्धसिद्धान्तग्रन्थानां परिचयः

## ४.३. सिद्धान्तस्कन्धस्य स्वरूपम्

शकपूर्वपञ्चशतकादारभ्य शकानन्तरषोडशतकपर्यन्तं हि भारतीयज्योतिषशास्त्र-विकासस्य मध्यकालः। कालेऽस्मिन् ग्रहाणां मध्ममगतिः, स्पष्टस्थितिः, दिग्देशकालविवेकः, ग्रहयुतिः, ग्रहनक्षत्राणामुदयास्तविचारः, चन्द्रशृङ्गोन्नतिः, पातः, भूस्थितिः, कालमानानि इत्यादि विषये सिद्धान्ताः निरूपिताः। अत एव अयं कालः सिद्धान्तकालः इति ज्ञायते।

सिद्धान्तः नाम गणितक्रियया निर्दिष्टः इति, व्यक्ताव्यक्तभगोलवासनमयः सिद्धान्तः इति, यत्र कल्पदेर्ग्रहानयनं स सिद्धान्तः इति। भास्कराचार्यैः उक्तम् यथा, सिद्धान्तो नाम --

**त्रुद्यादिप्रलयान्तकालकलना मनप्रभेदः क्रमात्**

**चारश्चद्युसदां द्विधा च गणितं प्रश्नास्तथासोत्तराः।**

**भूधिष्ण्यग्रहसंस्थितेश्च कथनं यन्त्रादि यत्रोच्यते**

**सिद्धान्तः स उदाहृतोऽत्र गणितस्कन्धप्रबन्धे बुधैः।।**

वैदिकसाहित्ये वेदाङ्गज्योतिषे च योऽपि ज्योतिषविषयः प्रस्तुतः स तत्कालीनदृष्ट्या पर्याप्तोपि ग्रहाणां स्पष्टगतिस्थितिबोधनाय नालमिति तत्साधकतया सिद्धान्तग्रन्थानां तदपेक्षया वैशिष्ट्यम्। सूर्यसिद्धान्तमारभ्य ब्रह्मगुप्तपर्यन्तमस्य पूर्वमध्यकालः तदनु जयसिंहपर्यन्तकालः उत्तरमध्यकालः। पूर्वमध्यकाले आर्षः सूर्यसिद्धान्तः, आर्यभटस्यार्यभटीयम्, वराहमिहिरस्य पञ्चसिद्धान्तिका ब्रह्मगुप्तस्य ब्रह्मस्फुटसिद्धान्तः उल्लेखनीय सिद्धान्तग्रन्थः। सिद्धान्तग्रन्थेषु वयमार्षत्वेन ख्यातं सूर्यसिद्धान्तग्रन्थमेव प्राथम्येन जानीमः।

## ४.४. पञ्चसिद्धान्ताः

सिद्धान्तस्कन्धवर्णनप्रसङ्गे प्राचीनसिद्धान्तपञ्चकम् अवश्यं स्मर्तव्यम्। पितामहसिद्धान्तः (ब्रह्मा), वासिष्ठसिद्धान्तः, रोमकसिद्धान्तः, पौलिषसिद्धान्तः, सूर्यसिद्धान्तः च इमे एव पञ्चसिद्धान्ताः।

## ४.५. पितामहसिद्धान्तः

अस्य एव ब्रह्मसिद्धान्तः इत्यपि नामान्तरं वर्तते। पितामहशास्त्रानुसारेण रविशशिनोः पञ्चवर्षाणि युगं, त्रिशद्भिर्मासैरधिमासः अह्नां त्रिषष्ट्या अवमः। अत्र अहर्गणानयनविधिः एवमुक्ता --

**द्यूनं शकेन्द्रकालं पञ्चभिरुद्धृत्य शेषवर्षाणाम्।**

**द्युगणं माघसिताद्यं कुर्याद् द्युगणं तदघ्नद्युदयात्।।**

अर्थात् द्वाभ्यां रहितं शकं पञ्चभिरुद्धृत्य शकवर्षाणाम् उपर्युक्तनियमानुसारेण अधिमासाख्ये कृत्वा माघशुक्लप्रतिपदादेर्द्युगणमहर्गणं कुर्यात्। अत्र शककालग्रहणेन एवं नावधेयं यत् सिद्धान्तोऽयं तदनन्तरवतीति। एवञ्च पितामहसिद्धान्ते उक्तम् यत् स्वैकषष्ट्यंशसहितेऽहर्गणे तिथिर्भवति। अहर्गणे ९ गुणिते ६१२ भक्ते धनिष्ठाद्यं रविभं तच्च सप्तभिरूनं चन्द्रभमिति। इत्थं हि पैतामहं तन्त्रं सर्वमपि वेदाङ्गज्योतिषसंवादि। युगस्य पञ्चसंवत्सरात्मकत्वमहर्गणानयनं नक्षत्राणां धनिष्ठादिमानं दिवसमानानयनप्रकारश्चोभयोरेव

समानः। गणितमिदं वेदाङ्गज्योतिषानतिदूरान्तरकालप्रोक्तमिति तेन स्पष्टमेव।

## ४.६. वासिष्ठसिद्धान्तः

ब्रह्मतः प्राप्तं ज्ञानं वसिष्ठः पराशराय ज्ञापितवान् तदेव वासिष्ठगणितम्। वराहमिहिरोपि वासिष्ठसिद्धान्तं स्वीय ग्रन्थे निर्दिशति। पञ्चसिद्धान्तिकायां एतत् सम्बद्धत्रयोदश गाथाः सन्ति। अत्रापि सूर्याचन्द्रौ गत्या विवेचितौ। अत्रत्य तिथिनक्षत्रानयनपद्धतिः राश्यंशकलामानानि च आधुनिकपद्धत्त्यापेक्षया विलक्षणानि। अत्र छायाविरोधिकं निरूपितः दिनमानापेक्षया। वासिष्ठसिद्धान्तोऽपि प्राचीननवीनभेदेन द्विधा।

सम्प्रति लघुवासिष्ठसिद्धान्त नाम्ना प्रकाशितो ग्रन्थः उभयविलक्षणः। अत्र ९४ श्लोकाः सन्ति।

## ४.७.रोमकसिद्धान्तः

नारायणेन यत्सूर्याय प्रोक्तं तदेव रहस्यं ब्रह्मणः शापाद्यवनजातिषु जातेन सूर्येण यद्रोमकायोपदिष्टं यच्च रोमकेण रोमकनगरे विस्तारिकं तदेव मौलिक रोमकगणितमिति। रोमकसिद्धान्तोऽपि प्राचीनार्वाचीनभेदेन द्विधा। प्राचीनः यथा वराहमिहिरप्रोक्तवत्, अर्वाचीनस्तु ब्रह्मगुप्तेन प्रोक्तम्। वराहमिहिरः रोमकसिद्धान्तं पौलिषसिद्धान्तवत् स्फुटं मन्यते। अत्रापि अहर्गणः एव आधारत्वेन स्वीकृतः।

रोमकसिद्धान्तप्रसङ्गे यावनगणकः हिपार्कसाख्यः अवश्यं स्मर्तव्याः एव।

## ४.८.पौलिषसिद्धान्तः

पाराशरं हि ज्ञानं पुलिशाख्येन मुनिना यद् गर्गादिभ्यः उक्तं तदेव पौलषगणितमिति प्रसिद्धम्। पञ्चसिद्धान्तिकाकारः वराहमिहिरः पौलिषसिद्धान्तं स्पष्टं मन्यते। पौलिशरोमकसिद्धान्तयोरहर्गणे साम्यं दृश्यते। सिद्धान्तेऽस्मिन् सूर्यचन्द्रातिरिक्तग्रहाणामपि वक्रत्वादिनिर्दिष्टं प्रतिभाति। सिद्धान्तेऽस्मिन् पलभातश्चरखण्डानयनं चरखण्डगतो दिनमानानयनञ्च निर्दिष्टम्। अत्र देशान्तरमपि विरचितम् सम्यक्। अत्र तिथिनक्षत्रानयनपद्धतिश्च वर्तमानपद्धताविव निर्दिष्टाऽस्ति।

पौलिशसिद्धान्तः लाटदेवेन व्याख्यातः इति वराहमिहिरसाक्ष्येण ज्ञायते।

## ४.९.सूर्यसिद्धान्तः

पञ्चसिद्धान्तिकायां सूर्यसिद्धान्तः स्पष्टतरसिद्धान्तत्त्वेन गृहीतः। सूर्यसिद्धान्तः त्रिविधः दृश्यते। तत्र प्रथमः आर्षः, पैतामहवासिष्ठसमकालिकः, द्वितीयस्तु वराहमिहिरेण पञ्चसिद्धान्तिकायां व्याख्यातः, तृतीयस्तु अर्वाचीनः सूर्यसिद्धान्ताख्यः ग्रन्थः। तत्राद्य विषये तु वयं नितान्तमेवाज्ञाः। ज्योतिषशास्त्रे सूर्यः यत्र तत्र स्तुतः दृश्यते ज्योतिषामधिपत्वेन सिद्धान्तप्रवृक्तृत्वेन वेति तु नैव निश्चेतुं शक्यते।

सूर्यसिद्धान्ते नहि केवलं चन्द्रसूर्ययोरेव यथा सिद्धान्तान्तरे अपि तु सर्वेषामेव ग्रहाणां गत्यादिकं निरूपयति। कथ्यते यत् साक्षात् भगवता एव सृष्टं कालचक्ररहस्यं तदेव आद्यं सूर्यगणितमिति। यत्तु सूर्यमयासुरसंवादरूपग्रन्थे लभ्यते तत्तु अर्वाचीनमिति तज्ज्ञानां मतम्। ब्रह्मगुप्तोऽपि मयासुरं गणिताचार्येषु गणयतीति साम्प्रतिकसूर्यसिद्धान्तग्रन्थस्यापि ब्रह्मगुप्तप्राग्वर्तित्वं मन्तव्यमेव।

## ४.१०. आधुनिकसूर्यसिद्धान्तः

आधुनिकसूर्यसिद्धान्तः सूर्यमयासुरसंवादरूपः चतुर्दशाधिकारोपेतः सिद्धान्तस्कन्धे उत्कृष्टं स्थानं भजते। मध्यम - स्पष्ट - त्रिप्रश्न - छेद्यक - चन्द्रग्रहण - सूर्यग्रहण - ग्रहयुति - उदयास्त - चन्द्रशृङ्गोन्नति - पात - भूगोल - ज्योतिषोपनिषत् मानसंज्ञकाः चतुर्दशाधिकारः अत्र विद्यन्ते। मध्यमाधिकारे युगमानं, कल्पमानं वा भगणभभ्रमचान्द्र-मासाधिमासाख्य - सौरवर्ष - ग्रहध्रुव - परमशरांशादिविषयाः निरूपितः। वस्तुतः अत्र मध्यमाधिकारे ग्रहाणां मध्यमस्थितिर्वर्ण्यते। स्पष्टाधिकारे तात्कालिकी स्थितिर्वर्ण्यते।

साम्प्रतिकसूर्यसिद्धान्तग्रन्थो हि स्यात्प्राचीनऽर्वाचीनो वा तस्य सिद्धान्तज्योतिषस्य करणग्रन्थेषु दृश्यते महान् प्रभावः। अस्य परमोपयोगित्वमाश्रित्वैवास्य प्रणीता, अनेकैः टीकाग्रन्थाः च रचिताः। तेषु रङ्गनाथस्य गूढार्थप्रकाशिका, नृसिंहदैवज्ञस्य सौरभाष्यम्, विश्वनाथस्य गहनार्थप्रकाशिका, दादाभाई इत्येतस्य किरणावली च प्रसिद्धाः टीकाग्रन्थाः।

## ४.११. वराहमिहिरः पञ्चसिद्धान्तिका च

ज्योतिषशास्त्रे वराहमिहिरस्य सर्वातिशायि स्थानं विद्यते। वराहमिहिरेण त्रिषु अपि स्कन्धेषु ग्रन्थाः रचिताः। पञ्चसिद्धान्तिका इत्ययं ग्रन्थः सिद्धान्तस्कन्धे विशिष्टं स्थानं भजते। अयं ग्रन्थः सङ्ग्रहग्रन्थ एव। अत्र विद्यमानाः श्लोकाः ग्रन्थान्तरादनूदितो दृश्यन्ते।

एतत् स्पष्टं यत् वराहमिहिरः प्राचीनसूर्यसिद्धान्तमेवात्मसात्करोतीति। विशेषतः देशान्तरे छायासाधने, ग्रहणे छेद्यके च स मूलतो विचारः कृतः। वराहमिहिरः सिद्धान्तप्रवर्तनेन नैव स्वाचार्यत्वं प्रदर्शितवान् किन्तु तस्य हि ज्योतिषाचार्यत्वं सर्वातिशायि। तस्य बृहज्जातकम् सम्प्रति जातकस्कन्धचूडामणित्वेन समाद्रियते सर्वैः।

आचार्य वराहमिहिरः स्वस्थितिकालजन्मविषये मौनमवलम्बते। एतत्तु कथ्यते यत् अवन्तिकापुर्यामासीदिति। यथा सः बृहज्जातकान्ते कथयति – '**आवन्तिको मुनिमतान्यवलोक्य सम्यक् होरां वराहमिहिरो रुचिरां चकार**' इति।

## ४.१२. ब्रह्मगुप्तः ब्रह्मस्फुटसिद्धान्तश्च

ब्रह्मगुप्तेन रचितः सिद्धान्तग्रन्थ ब्रह्मस्फुटसिद्धान्तः सिद्धान्तस्कन्धे प्रसिद्धः। अयं महान् ज्योतिषिकः वेधकुशलश्चासीत्। ब्रह्मगुप्तः जिष्णुनाम्नः सुतः गुर्जरप्रान्तस्थ-श्रीमालग्रामवास्तव्यः।

अनेन ५५० मिते शकाब्दे ब्रह्मस्फुटसिद्धान्तस्य रचना कृता। ब्रह्मगुप्तः महान् अन्वेशकः तीक्ष्णबुद्धिमान् च आसीत् इत्यत्र ग्रन्थ एव प्रमाणम्। वेधप्रसङ्गे यदा तेन दृष्टं यत् प्रचलितसिद्धान्तातीतग्रहस्थिति- वास्तविकस्थितेः च महदन्तरं इति ज्ञातं तदा एव सः दृक्प्रत्येयग्रहस्थितिसाधकसिद्धान्तरचनायां प्रवृत्तः। ब्रह्मस्फुटसिद्धान्तानन्तरं न कोऽपि नवीनः सिद्धान्तः प्रवर्तितः केनाऽपि। भास्कराचार्यः कमलाकरप्रभृतैरपि अमुमेव सिद्धान्तं स्थिरीकृत्य स्वीयसिद्धान्ताः मण्डिताः।

## ४.१३. खण्डखाद्यकरणम्

ब्रह्मगुप्तेन प्रणीतः अयं करणग्रन्थः खण्डखाद्यकरणमिति प्रसिद्धः। अयं ग्रन्थः भागद्वये विभक्तः। पूर्वभागे नवाधिकाराः, उत्तरार्धे पञ्च अधिकाराः वर्तन्ते। ग्रहाणां

दृक्प्रत्येयस्थितिसाधनमेव खण्डखाद्यस्य प्रयोजनम्।

## ४.१४. मुञ्जालः - बृहन्मानसं लघुमानसञ्च

मुञ्जालः कश्चित् महान् गणकः ८५४ मिते शकाब्दे जनिमलभत। मुञ्जालेन रचितौ द्वौ ग्रन्थौ बृहन्मानसं, लघुमानसं चेति। बृहन्मासम् इत्ययं सिद्धान्तग्रन्थः आर्याछन्दसि विद्यते। लघुमानसम् हि करणग्रन्थः अनुष्टुप् छन्दसि विलसति। अत्र सिद्धान्ते मध्यस्पष्टत्रिप्रशनसूर्यग्रहणग्रहयुतिचन्द्रग्रहणशृङ्गोन्नत्याख्याः अष्टाधिकाराः वर्तन्ते। अनेन चन्द्रस्पष्टेऽपि विशेषसंस्काराः उक्ताः ते नान्यत्र दृष्टाः। लघुमानसम् इत्याख्यस्य भट्टोत्पलटीका विद्यते।

## ४.१५. द्वितीय आर्यभटः महासिद्धान्ताश्च

आर्यभटः कश्चित् महान् ज्यौतिषिकः। एष हि ऐतिहासिकैर्द्वितीयार्यभट इति ख्यापितः। अस्य दृक्काणोदयसिद्धान्तं भास्कराचार्यः स्मरतीति तस्य भास्कराचार्यपूर्ववर्तित्त्वं स्पष्टमेव। दृक्काणो हि राशेस्तृतीयांशः। आर्यभटः लग्नं त्रिंशदंशत्त्वेन गृह्णाति न तु दशस्वंशेषु। आर्यभटः ब्रह्मगुप्त इव अयनचलनं स्थिरं मन्यते। अस्य सिद्धान्तः महासिद्धान्तत्त्वेन प्रसिद्धः। अत्र अष्टादशाध्यायाः वर्तन्ते। सर्वेऽपि अधिकाराः पाटीगणितसङ्कगणितं क्षेत्रफलघनफलादिकञ्च अत्र प्रतिपाद्यविषयाः।

## ४.१६.भट्टोत्पलः

काश्मीरदेशवासीयः भट्टोत्पलः प्रसिद्धः व्याख्याता आसीत्। खण्डखाद्य, बृहत्संहिता, बृहज्जातकाद्यनेके ग्रन्थाः अनेन व्याख्याः। अस्य स्थितिकालस्तु शकानन्तरनवम-शतकोत्तरार्धभागः इति अनुमीयते। त्रिष्वपिस्कन्धेषु अस्य महान् गतिरासीदिति अस्य टीकया एव स्पष्टं ज्ञायते। काव्यजगति मल्लिनाथस्य यत् स्थानं तदवास्य ज्योतिषक्षेत्रे।

## ४.१७. श्रीपतिः - सिद्धान्तशेखरः, धीकोटिदकरणम्, रत्नमाला, जातकपद्धतिः

९६० शकाब्दे श्रीपतिः नाम महान् गणितज्ञः स्वीयसिद्धान्तम् सिद्धान्तशेखरः इत्याख्ये ग्रन्थे निरूपयामास। अस्य सिद्धान्ताः भास्कराचार्येण सिद्धान्तशिरोमणौ सश्रद्धं

स्मर्यन्ते। त्रिस्कन्धस्यैव पण्डितोऽयं सिद्धान्तपक्षे आर्यसिद्धान्तानुयायी ग्नन्थप्रणयने लल्लानुगामीति तज्ञैरनुमीयते।

## ४.१८.भास्कराचार्यः - सिद्धान्तशिरोमणिः, करणकुतूहलम्

१०३६ मिते शकाब्दे भास्करः जनिमलभत। ततश्चोदेति भास्कराचार्यो ज्योतिषभास्करः। तस्य हि सिद्धान्तशिरोमणिनामकः सिद्धान्तग्रन्थः करणकुतूहलसंज्ञकः करणग्रन्थश्च सर्वानपि अतिशय्य ज्योतिषजगति स्वविजयपताकामुल्लासयन्तः विद्यन्ते।

सिद्धान्तशिरोमणेश्चत्वारो भागाः वर्तन्ते यथा लीलावती, बीजगणितम्, ग्रहगणितम्, गोलाध्यायश्च। अत्र ग्रन्थे भास्कराचार्यस्य प्रस्तुतिकौशल्येन सिद्धान्तः स्पष्टतां एति। अस्य गोलवर्णनम् करतलामलकात् स्पष्टम्। त्रिप्रश्नाधिकारे नवीना रीतयो निर्दिष्टाः। तेन हि शङ्कोरिष्टदिक्छायासाधनं कृतं यत् पूर्वाचार्यकृतग्रन्थेषु न विद्यते। पातसाधने पूर्वाचार्याणां मतं निरस्य स्वमतमुपस्थापितम्। यथा हि पूर्वं ग्रहाणां शराः क्रान्तिवृत्ते ध्रुवाभिमुखत्वेन वर्ण्यते स्म किन्तु भास्करेण ते हि क्रान्तिवृत्ते लम्बत्त्वेन वर्णिताः। उदयान्तरज्ञानम् अस्य नवीनं शोधनम्। अनेन गोलाध्याये गुरुत्वाकर्षणसिद्धान्तोऽपि प्रणीतः।

ज्योतिषसिद्धान्तस्य भास्करोऽन्तिमः आचार्यः। भास्करादेव प्रारब्धं शास्त्रं भास्करं प्राप्य विश्रान्तमिति नातिशयोक्तिः।

## ४.१९.गणेशः - ग्रहलाघवम्

गणेशदैवज्ञः केशवदैवज्ञसुतः। अस्य ग्रहलाघवमिति करणग्रन्थः लोकप्रियः बहुप्रयुक्तश्च। ज्याचापसम्बन्धं विनैव ग्रहानयनं सूक्ष्मतररीत्या एकादशवर्षान्तर्गताहर्गणचक्रमानेन ध्रुवाङ्केन मध्यमग्रहानयनं मानसंयोजनाय संयोगवियोगराशिनिर्देशश्च गणेशस्य वैशिष्टेषु समुल्लेखनीयः पक्षः।

## ४.२०.मुनीश्वरः सिद्धान्तसार्वभौमः

ज्योतिषशास्त्रे व्युत्पन्नमतिः गणकचक्रचूडामणिः मुनीश्वरः १५२५मिते शक्ते चैत्रशुक्लचतुर्दश्यां जनिमलभत। अयं हि सूर्यसिद्धान्तटिप्पनस्य गूढप्रकाशाभिधस्य प्रणेतुः

रङ्गनाथस्य पुत्रः। मुनीश्वरः भास्कराचार्यस्य अतीवभक्तः, सिद्धान्तशिरोमणेः गणिताध्यायस्य गोलाध्यायस्य च टीका मरीच्यभिधा क्रमेण १५५७, १५६० मिते शके मुनीश्वरेण निर्मिता।

मुनीश्वरेण तत्कालिक ग्रन्थान् अवलोक्य सूर्यसिद्धान्तोक्त भगणादीन् संगृह्य ज्योतिषसिद्धान्तग्रन्थः सिद्धान्तसार्वभौमः इति ग्रन्थः रचितः। चापीय क्षेत्रप्रपञ्चरहितत्वात् सम्प्रति गोलगणकैः बहुनाद्रियते। सिद्धान्तसार्वभौमः इत्यस्य ग्रन्थस्य विश्वरूप इति नामान्तरं विद्यते।

## ४.२१.कमलाकरः - सिद्धान्ततत्त्वविवेकः

कमलाकरभट्टविरचित सिद्धान्ततत्त्वविवेकः इत्ययं ग्रन्थः बहुचर्चितः। १५८० मिते शकाब्दे ग्रन्थोऽयं प्रणीतः। सर्वाङ्गपूर्णे ग्रन्थेऽस्मिन् सर्वेपि ज्योतिषविषयाः सप्रपञ्चं निरूपिताः।

कमलाकरः भास्करानुयायिनं मुनीश्वरं बहुत्र प्रसङ्गे आक्षिपति। तथा च भास्कराचार्यस्य उदयान्तर संस्कारमपि दूषयति। कमलाकरो हि न केवलं सूर्यसिद्धान्तस्याधिवक्ताऽपितु महानन्वेशकश्चासीत्।

## ४.२२. आदर्शप्रश्नाः

१) सिद्धान्तस्कन्धस्य वैशिष्ट्य प्रतिपादयत।

२) पञ्चसिद्धान्ताः के विवृणुत।

३) भास्कराचार्यः ।

४) सिद्धान्ततत्त्वविवेकः ।

# स्वावलोकनप्रश्नाः

१. सूर्यसिद्धान्तः ?

२. मुनीश्वरः ?

# पञ्चमः खण्डः
# ज्योतिषशास्त्रस्य वेदाङ्गत्वम्

## संरचना


५.१.प्रस्तावना

५.२.लक्षिताधिगमविशेषाः

५.३.वेदाङ्गत्वेन ज्योतिषम्

५.४.वेदाङ्गज्योतिषम्

५.५.याजुषज्योतिषम्

५.६.ऋग्ज्योतिषम्

५.७.अथर्वज्योतिषम्

५.८.महाभारते ज्योतिषम्

५.९.आदर्शप्रश्नाः


## ५.१. प्रस्तावना

प्रियच्छात्राः,

ज्ञानविज्ञानवारिधेः वेदस्य षडङ्गानि निर्दिष्टानि। शिक्षा, व्याकरणं, ज्योतिषम्, कल्पः, छन्दः निरुक्तञ्चेति। एतेषु षडङ्गेषु ज्योतिषम् वेदपुरुषस्य चक्षुत्वेन निर्दिष्टं वर्तते। उक्तञ्च --

'**वेदचक्षुः किलेदं स्मृतं ज्योतिषम्**' इति।

यस्य कस्यापि देशस्य ज्ञानविज्ञान - धर्माचरण - संस्कार - संस्कृति इत्यादीनाम् ऐतिहासिक - भौगोलिक - राजनैतिक - सामाजिक - वैज्ञानिकदृष्ट्या समसामयिकज्ञानं प्राचीनसाहित्यादेव प्राप्यते। भारतवर्षस्यास्य वेद एव सर्वतप्राचीनमस्ति। वेदः सर्वज्ञानविज्ञानसम्पन्नोऽस्ति। अयं वेदः वेदवाक् श्रुतिश्चेति नामभिः ख्यातः। श्रवणेन मननेनावलोकनेन च ऋषीणां महर्षिणामाध्यात्मचिन्तकानाञ्च दृष्टिपथे समायातः।

लोककल्याणकामनया तिथि - वार - नक्षत्र - योग - करण - उदयास्तकालज्ञान - ऋतुज्ञानपूर्वकम् शुभेसमये प्रकृतिदेवस्याराधनार्थं यज्ञादेर्व्यवस्था वर्तते। इमे यज्ञाः कालाधीनाः सन्ति। तस्य कालस्य ज्ञानम् सूर्य - चन्द्र - ग्रह- पृथिवी - नक्षत्रादीनां संयोगाधारेण भवति। एवं समयानुसारं वेदोक्तयज्ञसम्पादनेन उत्तमफलं प्राप्यते। अतः यज्ञादीनां कालविधायकं ज्योतिषशास्त्रम् वेदाङ्गस्य मुख्यमङ्गं नेत्ररूपं मन्यते।

## ५.२. लक्षिताधिगमविशेषाः

१. ज्योतिषशास्त्रस्य वेदाङ्गत्त्वनिरूपणम्

२. वैदिककाले ज्योतिषस्य स्वरूपम्

३. वेदाङ्गेषु ज्योतिषस्य स्थानम्

## ५.३.वेदाङ्गत्वेन ज्योतिषम्

ज्ञानप्रतिपादकस्य वेदस्य षडङ्गेषु ज्योतिषं चक्षुरूपं चकास्ति। यदुक्तं भास्कराचार्यैः --

**'वेदचक्षुः किलेदं स्मृतं ज्योतिषं मुख्यता चाङ्गमध्येऽस्य तेनोऽच्यते'**

ज्योतिषम् वेदोपकारकत्त्वात् वेदाङ्गेषु अन्यतमम्। वेदोक्त यज्ञादिकर्मणाम् अनुष्ठानार्थं कालनिर्णयः ज्योतिषमाधृत्यैव क्रियते स्म। यथोक्तम् --

**वेदास्तावद्यज्ञकर्मप्रवृत्ताः**

**प्रोक्तास्ते तु कालाश्रयेण।**

**शास्त्रादस्मात् कालबोधोयतः**

**स्याद्वेदाङ्गत्वं ज्योतिषस्योक्तमस्मात्।।**

वेदाङ्गत्वेन ज्योतिषम् वेदाङ्गेषु तथा ज्योतिषं च। वेदाङ्गत्वेन यज्जोतिषं तस्य हि लगधमुनेर्वेदाङ्गज्योतिषाख्यो ग्रन्थः प्रधानः। तथा च वसिष्ठकाश्यपनारदपराशरादिभिः ऋषिभिः मौलिकाः संहिताग्रन्थाः वर्तन्ते। अस्य हि चत्वारो भेदः अवलोक्यते यथा -- ऋग्जोतिषम्, यजुर्ज्योतिषम्, सामज्योतिषम्, अथर्वज्योतिषम्।

ऋग्जोतिषे ३६ कारिकाः, यजुर्ज्योतिषे ४९ कारिकाः, अथर्वज्योतिषे १६२ कारिकाः वर्तन्ते। एवमेव सूर्यप्रज्ञप्तिः, चन्द्रप्रज्ञप्तिः, ज्योतिषकरण्डकं, लघुवासिष्ठसिद्धान्तः, रोमकसिद्धान्तः, पौलिषसिद्धान्तः, सूर्यसिद्धान्तः च प्रसङ्गेऽस्मिन् स्मर्तव्या ग्रन्थाः।

## ५.४.वेदाङ्गज्योतिषम्

लगधनाम्ना मुनिना वेदाङ्गज्योतिषम् इत्याख्यो ग्रन्थः प्रणीतः। अयमेव भारतीयज्योतिषस्य स्वतन्त्रः प्रथमो ग्रन्थः। ग्नन्थेऽस्मिन् ४२ कारिकाः वर्तन्ते। ज्योतिषशास्त्रस्य आद्यः अयं ग्रन्थः अत्यन्तम् उत्कृष्टः च।

अयं ग्रन्थः कदा सङ्कलितः इति विचारः निर्दृष्टं नैव ज्ञायते। कालचक्रशास्त्रमिदं स्वकालविषये न किमपि वक्ति। अस्य हि वाचनलेखनादिकं यदा कदापि सम्पन्नं स्यात्। तेनाऽपि कालेन कथमपि विक्रमपूर्वसप्तशतकानन्तरवर्तिना तु कदापि नैव भाव्यमेव महाभारतादावपि तस्य स्मरणात्। तत्कालीननक्षत्रगणना सम्पातगत्ययनचलनादीनामध्ययनेन स्पष्टमेवैतद् यदिदं शास्त्रं विक्रमतः १४०० वर्षपूर्वमेव प्रोक्तमासीदिति।

## ५.५.याजुषज्योतिषम्

याजुषज्योतिषम् इत्याख्यः अयं ग्रन्थः ४९ श्लोकैः समाद्धृतः वर्तते। अस्य प्रयोजनं तु पूर्वोक्तवदेव। यथोक्तम् -- **युगश्च पञ्चवर्षाणि कालज्ञानं प्रचक्षते**। अत्र युगनिरूपणम् एवं वर्तते। यथा --

**त्रिंशत्यह्नां सषट् षष्ठिरब्दः षड् ऋतवोऽयने।**

**मासा द्वादश सूर्याः स्युरेतत्पञ्चगुणं युगम्।।**

वर्षे ३६६ दिनानि षड् ऋतवः द्वे अयने १२ सौरमासाः च इति।

## ५.६.ऋग्ज्योतिषम्

ऋग्वेदज्योतिषं हि लगधमुनिना प्रणीतमिति प्रसिद्धम्। अत्र ३६ कारिकाः लभ्यन्ते। येषां सोमाकरकृता विसृतात लघ्वी च इति द्वे व्याख्ये लभ्येते। विस्तृत व्याख्यासमाप्तौ शेषकृतवेदाङ्गज्योतिषम् समाप्तमिति लिखितमस्ति। अत्र लगधः, सोमकरः, शेषः इत्येवं

मुनित्रयाणां योगदानं वर्तते। अत्र मुख्यतया उत्तरदक्षिणायनारम्भस्य पञ्चैव स्थितयो भवन्तीति पञ्चसंवत्सरयुगस्थाधिवादः प्रतिपादितः। यथा --

**उत्तरायणारम्भे**

| **संवत्सराः** | **तिथयः** | **रविभानि** | **चन्द्रभानि** |
|---|---|---|---|
| संवत्सरः | माघशुक्लप्रतिपत् | धनिष्ठा | धनिष्ठा |
| परिवत्सरः | माघशुक्लचतुर्थी | धनिष्ठा | धनिष्ठा |
| इदावत्सरः | माघकृष्ण दशमी | धनिष्ठा | अनूराधा |
| अनुवत्सरः | माघशुक्लसप्तमी | धनिष्ठा | अश्विनी |
| इद्वत्सरः | माघकृष्णचतुर्थी | धनिष्ठा | उत्तराफल्गुनी |

**दक्षिणायनारम्भे**

| **संवत्सराः** | **तिथयः** | **रविभानि** | **चन्द्रभानि** |
|---|---|---|---|
| संवत्सरः | श्रावणशुक्लसप्तमी | आश्लेषार्धा | चित्रा |
| परिवत्सरः | श्रावणशुक्लचतुर्थी | आश्लेषार्धा | पूर्वाभाद्रा |
| इदावत्सरः | श्रावणशुक्लप्रतिपत् | आश्लेषार्धा | आश्लेषा |
| अनुवत्सरः | श्रावणशुक्लत्रयोदशी | आश्लेषार्धा | पूर्वाषाढा |
| इद्वत्सरः | श्रावणशुक्लदशमी | आश्लेषार्धा | रोहिणी |

## ५.७.अथर्वज्योतिषम्

अथर्वज्योतिषम् इत्याख्यः अयं ग्रन्थः फलितज्योतिषसम्बद्धः। ग्रन्थेऽस्मिन् १६२ श्लोकाः १४ प्रकरणानि च वर्तन्ते। अयं ग्रन्थः पितामहकाश्यपसंवादरूपः। कालविभाजनं रौद्रसौम्यकर्मयोग्यनक्षत्राद्युल्लेखाः करणादीनि च अस्य प्रतिपाद्यविषयाः। अत्र उक्तं यथा --

**तिथिरेकगुणा प्रोक्ता नक्षत्रञ्च चतुर्गुणम्।**

**वारश्चाष्टगुणः प्रोक्तः करणं षोडशान्वितम्।।**

**द्वात्रिंशत् योगस्तारा षष्टिसमन्विता।**

**चन्द्रः शतगुणः प्रोक्तस्तस्माच्चन्द्रबलाबलम्।।**

ग्रन्थेऽस्मिन् सप्तग्रहाणाम् उल्लेखः एवं विद्यते --

**आदित्यसोमौ भौमश्च तथा बुधबृहस्पती।**

**भृगुः शनैश्चरश्चैव एते सप्तदिनाधिपाः।।** इति।

ग्रन्थेऽस्मिन् मेषादिराशीनामुल्लेखो नैव दृश्यते। तस्मात् अथर्वज्योतिषम् इत्याख्यस्य ग्रन्थस्य राशिप्रचलनादपि प्राग्वर्तित्वं स्पष्टमेव।

## ५.८.महाभारते ज्योतिषम्

महाभारतं तु भारतीयपरम्परायाः विश्वकोश एव। अस्मिन् महाकाव्ये ज्योतिषविषयाः बहुत्र प्रस्तुताः सन्ति। अत्र द्वादशसंवत्सरपद्धतिः प्रचलिता इत्यनुमीयते। सा हि गुरोः उदयास्तमयोरवलम्बिता। तथा च क्षयदिनम्, वृद्धिः, अनयोर्ज्ञानमासीदिति ज्ञायते। स्पष्टगतेः सूक्ष्मज्ञानं विना क्षयः नैव ज्ञायते। तेन इदं स्पष्टं ज्ञायते यत् तदा गुरोः सूक्ष्ममध्यगतेर्ज्ञानमवश्यम् आसीदिति।

तत्र धूमकेतूनाम् उल्कापातानां च उल्लेखः बहुत्र दृश्यते। कालेऽस्मिन् वर्षायाः कारणं ऋतुकारणं च सूर्यः एव इति ज्ञानमासीदिति स्पष्टम्।

**त्वमादायांशुभिस्तेजो निदाधे सर्वदेहिनाम्।**

**सर्वौषधिरसानाञ्च पुनर्वर्षासु मुञ्चसि।।**

तथाचात्र समुद्रस्योत्तरङ्गस्य चन्द्रमसा सह सम्बन्धः पृथिव्याः गोलत्वं चन्द्रमसः पृष्ठस्यादृश्यत्वञ्चोक्तम्। यथा --

**यथा हिमवतः पार्श्वं पृष्ठं चन्द्रमसो यथा।** इति।

महाभारते ज्योतिषस्य संहितास्कन्धस्य ज्ञानं विपुलं दृश्यते। अत्र संवत्सरादिज्ञानं यथा --

**अनुसंवत्सरं जाताः पाण्डवाः कुरुसत्तमाः।**

**पाण्डुपुत्रा व्यराजन्त पञ्चसंवत्सरा इव।।**

समयगणना यथा --

**तेषां कालातिरेकेण ज्योतिषाञ्च व्यतिक्रमात्।**

**पञ्चमे पञ्चमे वर्षे द्वौ मासावुपजायता।।**

**एषामप्यधिका मासाः पञ्च च द्वादश क्षपाः।**

**त्रयोदशानां वर्षाणामिति मे वर्तते मतिः।।**

पञ्चसु वर्षेषु द्वयोरधिमासयोरवस्थितिर्हि वेदाङ्गज्योतिषानुसारेण सिध्यति। तत्र नक्षत्रगणना कृत्तिकादारभ्य कृता। महाभारते अनुशासनपर्वणि कृत्तिकातः आरभ्य भरणीपर्यन्तं नक्षत्रगणना आसीदिति तत्तन्नक्षत्रेषु दानविशेषनिर्देशद्वारा ज्ञायते।

अत्रोक्त नक्षत्रगणनाक्रमसम्बन्धः एवं भासते यथा आदौ अभिजित् नक्षत्रात् २७ नक्षत्राणां गणना आसीदिति। अभिजित् नक्षत्र कालवशेन निस्तेजस्काः सम्पद्यत। ततः नक्षत्रसंख्या पूरणाय कृत्तिका नक्षत्रम् गृहीतमिति। यस्य नक्षत्रस्याद्यक्षणे चन्द्रसूर्यगुरूणां योगः तत् युगादिनक्षत्रमिति।

एवं महाभारते ज्योतिषस्य प्रसङ्गः बहुत्र विद्यते। तेन वयम् इदं ज्ञातुं शक्नुमः यत् तस्मिन् काले एव ज्योतिषस्य प्राशस्त्यं समाजे तत् स्थानं च किञ्चित् विशिष्टमासीदिति।

ज्योतिषस्य वेदाङ्गत्वनिरूपणावसरे वेदाङ्गान्तरेष्वपि विषयोयं वर्णितः इति स्पष्टं ज्ञायते। यथा कल्पसूत्रेषु श्रवण्यां पौर्णमास्यां श्रवणकर्म अत्रैव षण्मनूनामपि विचारः वर्णितः। बहुषु स्थलेषु अयनस्य विषुवस्य च उल्लेखः दृश्यते। तथा चात्र ध्रुव-अरुन्धतीसप्तर्षीणामपि समुल्लेखो दृश्यते। यथा -- **'ध्रुवमरुन्धती सप्तर्षीनिति दृष्ट्वा वाचं विसृजेत्'** इति।

पारस्करगृह्यसूत्रेऽपि ज्योतिषविषयक प्रसङ्ग उपलभ्यते। यथा --

**'मार्गशीर्ष्यां पौर्णमास्यामाग्रहायणीकम्'**

**'त्रिषु त्रिषु उत्तरादिषु स्वातौ मृगशिरसि रोहिण्याम्'**

**'ज्योष्ठायां क्षेत्रकर्षणम्'**

हिरण्यकेशीयादिसूत्रेष्वपि बहुधाज्योतिषप्रसङ्गो दृश्यते। बौधायनसूत्रे मेषादिराशीनामुल्लेखः वर्तते।

निरुक्तेऽपि ज्योतिषविचाराः वर्णिताः यथा -- **सप्तऋषीणानि ज्योतींशि।** तथा चात्र दिनरात्रिपक्षायनादीनामुल्लेखः यथा -- **युगसहस्रान्तमहर्ब्रह्मणो विदुः रात्रिं युगसहस्रान्तां तेऽहोरात्रविदो जनाः** इति। ज्योतिषस्य मुखरूपम् अङ्गं व्याकरणम्। अत्राऽपि वर्षाल्लुक्

च, दामहायनान्ताच्च, साऽस्मिन् पौर्णमासीति एवं प्रकारेण नैकानि ज्योतिषसम्बद्धसूत्राणि समुपलभ्यन्ते।

याज्ञवल्क्यस्मृतौ अपि ग्रहाणामुल्लेखः, क्रान्तिवृत्तस्य द्वादशभागाः तथा नक्षत्रमधिकृत्यापि विवरणं प्रदत्तं वर्तते। यथा -- **कृत्तिकादिभरण्यन्तम्**। एवञ्च श्राद्धमुद्दिश्योक्तम् --

**अमावास्याष्टका वृद्धिः कृष्णपक्षोऽयनद्वयम्।**

**द्रव्यं ब्राह्मणसम्पत्तिर्विषुवत्सूर्यसङ्क्रमः।।** इति।

तथाचात्र समरात्रिन्दिवः कालः विषुवदिति। सङ्क्रमो नाम सूर्यस्य राश्यान्तरप्रवेशेति वर्णितम्। ग्रहयुतिस्तत्फलमपि तत्र निर्दिष्टम्। एवं तत्र ज्योतिषसम्बद्धा अनेके विषयाः प्रसङ्गोपयोगेन उद्धृताः।

एवं स्मृत्यन्तरेष्वपि प्रसङ्गीययोगेन तत्र तत्र ज्योतिषविषयः उल्लिखितो विद्यते। कानिचन वेदोक्त ज्योतिषसम्बद्ध उदाहरणानि अत्र लिख्यन्ते --

**'नमोऽस्तु रुद्रेभ्यो ये दिवि येषां वर्षमिषवः।'** (यजुर्वेदः)

**'चन्द्रमा मनसो जातश्चक्षोः सूर्योऽअजायत।'** (ऋग्वेदे)

**'द्यौन्तरिक्षे प्रतिष्ठिताऽन्तरिक्षं पृथिव्यम्।'** (ऐतरेय ब्राह्मणम्)

**'देवानां पूर्वे युगे सतऋ सदजायत।'** ( ऋग्वेदः)

**'अग्निर्वा संवत्सरः आदित्यः परिवत्सरः, चन्द्रमा इदावत्सरः, वायुरनुवत्सरः।'** (तैत्तिरीयब्राह्मणे)

**'षड्रात्रिर्दीक्षितः स्यात् षड् वा ऋतवः संवत्सरः**

**द्वादशरात्रीर्दीक्षितस्याद् द्वादश मासाः संवत्सरः**

**त्रयोदशरात्रीर्दिक्षतः स्यात् त्रयोदश मासाः संवत्सरः'।** (तैत्तिरीयसंहिता)

**'संवत्सरं ह्येकं चक्र तस्य हि द्वादश प्रधयश्चैत्रादयः, त्रीणि नम्यानि चैत्रादारभ्य मासचतुष्करूपाणि चातुर्मास्यत्रिकमिति। तस्य हि त्रिशतं षष्टिश्च शङ्कवः दिवसाः**

**चला अचलाश्च रात्रयस्तावत्य एवेति सप्तशतं विशतिश्च'** इति। (ऋग्वेदे)

**'तस्य त्रीणि च शतानि षष्टिश्च स्तोत्रीयास्तावतीः संवत्सरणस्य रात्रयः।'** (तैत्तिरीयसंहिता)

एवं प्रकारेण वेदेषु बहुत्र ज्योतिषविषयक उद्दरणानि तत् तत् प्रसङ्गे उद्धृतानि वर्तन्ते। वेदस्य षडङ्गेषु ज्योतिषम् चक्षुस्वरूपमिति अत्र वेदाः एव प्रमाणम्। तस्मादेव वेदाङ्गेषु ज्योतिषम् मूर्ध्निस्थितं वर्तते। उक्तञ्च --

**यथा शिखा मयूराणाम् नागानां मणयो यथा।**

**तद्वद्वेदाङ्गशास्त्राणां ज्योतिषं मूर्ध्निस्थितम्।।** इति।

## ५.९. आदर्शप्रश्नाः

१) ज्योतिषशास्त्रस्य वेदाङ्गत्वं निरूपयत।

२) वेदाङ्गज्योतिषं विशदयत।

३) महाभारते ज्योतिषं विवृणुत।

४) ऋग्ज्योतिषाथर्वज्योतिषौ विवृणुत

# षष्ठः खण्डः

# विशिष्टज्योतिर्विदां सङ्क्षिप्तपरिचयः

## संरचना

६.१. प्रस्तावना

६.२. लक्षिताधिगमविशेषाः

६.३. लगधाचार्यः

६.४. आर्यभटः

६.५. वराहमिहिरः

६.६. भास्कराचार्यः

६.७. गणेशदैवज्ञः

६.८. कमलाकरभट्टः

६.९. ब्रह्मगुप्तः

६.१०. रामदैवज्ञः

६.११. कल्याणवर्मा

६.१२. लल्लाचार्यः

६.१३. श्रीपतिः

६.१४. प्रसिद्धज्योतिषग्रन्थकाराणां तत्प्रणीतग्रन्थानाञ्चसूची

६.१५. आदर्शप्रश्नाः

## ६.१. प्रस्तावना

महाजनो येन गतः स पन्थाम् इति प्रसिद्धा लोकोक्तिः। अनया उक्त्या अस्माभिः इदम् अवधार्यं यत् विशिष्टैः विद्वद्भिः यथा आचरितमं तस्य अनुसरणं तथा च तैः निर्दिष्ट सिद्धान्तानां परिपालनञ्च कर्तव्यमिति। अत एव विशिष्टज्योतिर्विदां संक्षिप्तपरिचयः इति शीर्षकोपेतः विषयः अत्र विचार्यते। अनेन ज्योतिषाचार्याणां परम्परायाः ज्ञानम्, तैः अनुसृतपद्धतीनां ज्ञानम् च ज्ञायते। तथा च पूर्वाचार्याणां स्थितिः, कालः, स्थानमित्यादि ज्ञानं भवेत्।

ज्योतिषशास्त्रम् अत्यन्तं विस्तृतं वैशिष्ट्यपूर्णम् वरीवर्ति। वेदकालादारभ्य एव शास्त्रस्यास्य प्रयोजनं दृश्यते। नैकैः आचार्यैः ज्योतिषशास्त्रे स्वीय योगदानं प्रदत्तं वर्तते।

सिद्धान्त - संहिता - होरा इत्येतेषु त्रिषु स्कन्धेषु च विद्वद्भिः ग्रन्थाः विरचिताः सन्ति। आचार्याणां कालः, स्थानम् इत्यादि विषयाणां विचारणेन ज्योतिषशास्त्रविकासपरम्परायाः सूक्ष्मज्ञानं प्राप्यते। अत एव 'विशिष्टज्योतिर्विदां सङ्क्षिप्तपरिचयः' इति शीर्षकोपेतः विचारः अत्र क्रियते।

## ६.२. लक्षिताधिगमविशेषाः

१) ज्योतिषाचार्याणां परम्परायाः ज्ञानम्।

२) ज्योतिषाचार्याणां योगदानम्।

३) विशिष्टज्योतिषाचार्याणां परिचयः।

४) ज्योतिषाचार्याणां सिद्धान्ताः कृतयश्च।

## ६.३. लगधाचार्यः

लगधाचार्यः वेदाङ्गज्योतिषस्य प्रवृक्तृत्वेन स्मृतः। लगधः ज्योतिषशास्त्रस्य आद्यः आचार्यः।

**प्रपद्येते श्रविष्ठादौ सूर्याचन्द्रमसावुदक्।**

**सार्पार्द्धे दक्षिणार्कस्तु माघश्रवणयोः सदा।।**

इति कथनानुसारं वेदाङ्गज्येतिषग्रन्थरचनाकालः शकपूर्वचतुःशताधिकैकसहस्राब्दीमभितो अनुमितः। लगधस्य तु ततः पूर्व एव।

## ६.४. आर्यभटः

भारतीयज्योतिषाचार्येषु आर्यभटः विशिष्टं स्थानं भजते। आर्यभटः कुसुमपुरवासी इति स्वयमेव कथयति यथा -- 'आर्यभट्टस्त्विह निगदति कुसुमपुरेऽभ्यर्जितं ज्ञानम्' इति। परन्तु अस्य स्थानविषये ऐक्यमत्यं नास्ति। तस्य स्थितिकालमधिकृत्य स्वयमेव कथयति --

**षष्ट्यब्दानां षष्टिर्यदा व्यतीतास्त्रयश्च युगपदाः।**

**त्र्यधिका विंशतिरब्दास्तदेह मम जन्मलोऽतीताः।।**

यदा कलियुगस्य ३६०० वर्षाणि व्यतीतानि तदा स त्रयोविंशतिवर्षवयस्कः आसीदिति अर्थात् ३५७७ कलिगतवर्षे तस्य जन्मेति। आर्यभटः कुत्रापि शकोल्लेखं नैव करोति। अनेन तदा शककालगणना नैवासीदिति प्रतिभाति।

आर्यभटस्य आर्यभटीयमिति ग्रन्थः अत्यन्तं प्रसिद्धः। अत्र दशगीतिका-गणित-कालक्रिया-गोलाख्याः सन्ति चत्वारः पादाः। अनेनैव आचार्येण भूभ्रमणसिद्धान्तः निरूपितः। अस्यैव प्रयासेन सिद्धान्तज्योतिषस्य व्यवस्थितविकासः प्रारब्धः। आर्यभटीयसूत्रे सूर्योदयाद्दिनप्रवृत्तिः उक्ता।

## ६.५. वराहमिहिरः

वराहमिहिरः शकगत ४०७ तमे वर्षे जन्म अलभत। अयम् आदित्यदासस्य पुत्रः, अवन्तिकायां निवसति स्म। अनेन बृहज्जातके उक्तम् यथा --

**आदित्यादासतनयस्तदवाप्तबोधः कपिन्यकेसवितृलब्धवरप्रसादः।**

**आवन्तिको मुनिमतान्यवलोक्य सम्यग् होरां वराहमिहिरो रुचिरां चकार।।**

प्रथमः आचार्यः येन ज्योतिषशास्त्रस्य सिद्धान्त-संहिता-होरेति त्रिषु स्कन्धेषु ग्रन्थाः विलिखिताः यथा होरास्कन्धे बृहज्जातकम्, संहितास्कन्धे बृहत्संहिता, सिद्धान्तस्कन्धे पञ्चसिद्धान्तिका इमे अद्यत्त्वेऽपि अत्यन्तं प्राधान्यं भजन्ते। होरास्कन्धस्य बृहज्जातकमस्य सर्वत्र प्रसिद्धम्, बहुभिः व्याख्यातश्च ग्रन्थः। अस्य ग्रन्थस्य व्याख्यासु भट्टोत्पलस्य, महीधरस्य, गोविन्दस्य च टीकाः प्रसिद्धाः।

वराहमिहिरस्य ज्ञानं त्रिषु अपि स्कन्धेषु समानतया आसीदिति अत्र रचितग्रन्थाः एव प्रमाणम्। तथा च अस्य रचनासौष्ठव रचनायाः काव्यात्मकत्वञ्च प्रशंसनीयं दृश्यते। सरलता, सङ्क्षिप्तता, स्पष्टता, गूढार्थवत्ताचास्य रचनागतगुणाः।

## ६.६. भास्कराचार्यः

शाण्डिल्यगोत्रोत्पन्नः भास्करः महेश्वरस्य पुत्रः। भास्कराचार्यस्य स्थानं सह्याचल-निकटवर्तिप्रदेशः इति कथ्यते। सः स्वयमेव कथयति यत् --

**आसीत् सह्यकुलाचलाश्रितपुरे त्रैविद्यद्वज्जने।**

**नानासज्जनधाम्नि विज्जद्वविडे शाण्डिल्यगोत्रो द्विजः।।**

आचार्योयं १०३६ शकाब्दमभितः स्थितवानिति ज्ञायते। यथा --

**रसगुणपूर्णमही समशकनृपसमयेऽभवन्ममोत्पत्तिः।**

**रसगुणवर्षेण मया सिद्धान्तशिरोमणी रचितः।।**

भास्कराचार्यस्य सिद्धान्तशिरोमणिः, करणकुतूहलञ्च प्रसिद्धौ ग्रन्थौ। सिद्धान्तशिरोमणिर्हि पाटीगणित-बीजगणित-ग्रहगणित-गोलाध्यायेति चतुर्भागेषु विभक्तः ग्रन्थः। अस्य हि पाटीगणितभागः लीलावती इति नाम्ना प्रख्यातः। कथ्यते हि लीलावती इति एका तस्य पुत्री आसीदिति। तस्याः अपरिहार्यवैधव्ययोगं दृष्ट्वा अपरिणीतायाः तस्याः सन्ततित्वेन ग्रन्थोयं प्रणीतः इति। केचित्तु लीलावती तस्य गृहिणीति मन्यन्ते। ग्रहगणितगोलाध्यायः वासनाभाष्यमपि भास्कराचार्येण प्रणीतम्। सिद्धान्तशिरोमणिः इत्ययं सिद्धान्तग्रन्थः सिद्धान्तस्कन्धे उत्कृष्टः राजते।

करणकुतूहलमिति अस्य करणग्रन्थः अपि प्रसिद्धः। अस्योपरि नैकैः विद्वद्भिः टीकाः रचिताः। अस्यैव आचार्यस्य विवाहपटलाख्यो ग्रन्थः अत्यन्तं प्रसिद्धः। भास्कराचार्येण गणितज्योतिषस्य विस्तारः कृतः उपपत्तिश्च साधिता। तथा च अस्य लेखनशैली अत्यन्तं सरसा सरला च विद्यते इत्यनेन अस्य साहित्यशास्त्रे महान् प्रवेशः आसीदिति स्पष्टम्। विशेषतया लीलावती इत्यस्मिन् ग्रन्थे प्रत्येकोऽपि श्लोकः रमणीयः विद्यते। भास्कराचार्यो हि ज्योतिषशास्त्रस्य साक्षात् भास्कर एव।

## ६.७. गणेशदैवज्ञः

गणेशदैवज्ञः प्रसिद्धः ज्योतिषाचार्यः केशवस्य पुत्रः आसीत्। अनेन त्रयोदशाधिकाः ज्योतिषशास्त्रसम्बन्धी ग्रन्थाः विलिखिताः। ग्रहलाघवमिति अस्य आद्यः ग्रन्थः। ग्रहलाघवे १४४२ शकवत्सरं उपक्रमवर्षत्वेन गृहीतम्। तेन सः एव कालः तस्य प्रणयनकालः इति ज्ञायते। ग्रहलाघवं हि तस्य अत्यन्तं प्रसिद्धः सर्वव्याप्यः ग्रन्थः। ज्योतिषविषये तस्य सुविपुलं ज्ञानं तेन ग्रन्थेऽस्मिन् निहितम्। ग्रहसाधनविषये तेन तत्रोक्तम् यथा --

**सौरोऽर्कोऽपि विधूच्यमङ्ककलिकोनाब्जो गुडस्त्वर्यजो**
**सृग्राहू च कुजज्ञकेन्द्रकमथर्थः सेषुभागः शनिः।**
**शौक्रं केन्द्रमजार्यमध्यगतितोये यान्ति दक्तुल्यताम्।।**

अर्थात् सौरसिद्धान्ततः सूर्याचन्द्रमसौ दृग्गणिततुल्यौ भवतः। यदा तत्र चन्द्रमपि नवकलाः शोधिता भवन्ति। तथा च गणेशदैवज्ञेन ज्याचापं विनैव सर्वमेव गणितम् साधितम्। अनेन गणितं सारल्यमानीतम्।

## ६.८. कमलाकरभट्टः

१५३८ मिते शके कलमाकरः जन्म प्राप्तवान्। नृसिंहदैवज्ञस्य पुत्रः प्रसिद्धः ज्योतिर्विद्, काशीक्षेत्रवासी। अयं सिद्धान्ततत्त्वविवेकः इत्याख्यं ग्रन्थं १५८० तमे शके प्रणिनाय।

सिद्धान्ततत्त्वविवेकः इति ग्रन्थः कमलाकरभट्टस्य प्रसिद्धः सिद्धान्तग्रन्थः। अत्र अनेन मुनीश्वरकृत सिद्धान्तसार्वभौमस्य, भास्कराचार्यकृत सिद्धान्तशिरोमणेः च नैके विषयाः दूषिताः। गन्थावलोकनेन ज्ञायते यत् पक्षपातधिया हठादपि अनेन दूषणं कृतमिति। यतः कमलाकरभट्टः सूर्यसिद्धान्तस्य परमः पोषकः, यथा सः तदतिरिक्तान् सिद्धान्तान् सुसूक्ष्मानामपि अशुद्धं मन्यते। सिद्धान्ततत्त्वविवेके केचन नवीना विषयाः सन्ति येषां विषयाणां तत्प्राग्वर्तिग्रन्थेषु समावेशो नासीत्। यथा, सम्पातस्य गत्या ध्रुवनक्षत्रस्याप्यस्थिरत्त्व पूर्वापरसूत्रयोस्तस्य भिन्नस्थानत्त्वमित्यादि।

निर्णयसिन्धुः, काव्यप्रकाशटीका च अस्य रचनासु प्रसिद्धग्रन्थाः।

## ६.९. ब्रह्मगुप्तः

५२० मिति शकाब्दे ब्रह्मगुप्तः जन्म अलभत। अयं हि जिष्णोः पुत्रः। अनेन आचार्येण ५५०मिते शकाब्दे ब्रह्मस्फुटसिद्धान्तः, ४८७ तमे शकाब्दे खण्डनखण्डखाद्यम् इत्याख्यः करणग्रन्थश्च विरचितः। अयं गुर्जरप्रान्तस्थ भिन्नमालग्रामवास्तव्यः आसीत्।

ब्रह्मगुप्तेन पञ्चसिद्धान्तिकायां वराहेण दूरविभ्रष्टत्त्वेन कथितः पैतामहसिद्धान्तः

सबीजाधानां व्याख्यातः। यथोक्तम् --

**ब्रह्मोक्तं ग्रहगणितं महता कालेन यत्खिलीभूतम्।**
**अभिधीयते स्फुटं तज्जिष्णुसुतब्रह्मगुप्तेन।।**

**संसाध्य स्पष्टतरं बीजं नलिकादियन्त्रेण।**
**तत्संस्कृतग्रहेभ्यः कर्तव्यौ निर्णयादेशौ।।**

आवश्यकश्च। यथाऽह सिद्धान्तशिरोमणिकारः -- 'यदा पुनर्महता कालेन महदन्तरं तदा महामतिमन्तो ब्रह्मगुप्तसमानधर्मिण एवोत्पत्स्यन्ते। ते तदुपलब्ध्यनुसारिणीं गतिमुररीकृत्य शास्त्राणि करिष्यन्ति। एवं ब्रह्मगुप्तः ज्योतिषशास्त्रे श्रेष्ठः आचार्यः इति ख्यातिं स्वीयरचना, सिद्धान्ताः एव प्रमाणम्।

## ६.१०. रामदैवज्ञः

रामदैवज्ञः प्रसिद्धः दैवज्ञः। ज्योतिषशास्त्रे महान् योगदानं च अनेन कृतम्। अयं हि अनन्तदैवज्ञस्य सुतः, मुहूर्तचिन्तामणिः इत्याख्यस्य ग्रन्थस्य प्रणेता।

१५१२ शके रामदैवज्ञेन मुहूर्तचिन्तामणिः इत्ययं ग्रन्थः प्रणीतः। कथ्यते हि ग्रन्थोऽयं जयपुरशासकरायनृपतेराज्ञया प्रणीत इति। प्रसिद्धे ग्रन्थेऽस्मिन् सन्ति बहवष्टीकाः यासु ग्रन्थकृत एव प्रयिताक्षरा, गोविन्दस्य पीयूषधारा च प्रसिद्धाः।

ग्रन्थेऽस्मिन् शुभाशुभ - नक्षत्र - सङ्क्रान्तिः - गोचर - संस्कार - विवाह - वधूप्रवेष - द्विरागमन - अग्न्याधान - राजाभिषेक - यात्रा - वास्तु - गृहप्रवेश प्रभृतिप्रकरणानि सन्ति।

## ६.११. कल्याणवर्मा

कल्याणवर्मा नामकः कश्चिद् प्रसिद्धः दैवज्ञः ५००मिते शके प्रादूरभूत्। तस्य सारावली इत्ययं ग्रन्थः प्रसिद्धः। ज्योतिषस्य फलितस्कन्धे अस्य योगदानम् अत्यन्तं महत्त्वपूर्णं वैशिष्ट्यं च आसीदित्यत्र सारावली इत्याख्यः ग्रन्थः एव प्रमाणम्। यद्यपि

सारावली यावहोराशास्त्रसारत्वेन प्रतिज्ञाता तथापि आर्षशास्त्रस्य वराहशास्त्रस्य चात्र पूर्णतः परिपालनं कृतं दृश्यते।

कल्याणवर्मा गुर्जरप्रदेशस्थ देवग्रामवास्तव्यः आसीदिति। अयं हि स्वविषये इत्थं कथयति --

**देवग्रामपुरप्रपोषणवलाद् ब्रह्माण्डसत्पञ्जरे**

**कीर्तिर्हंसविलसिनीव सहसा वस्येह भान्यातता।**

**श्रीमद्व्याघ्रपरीश्वरो रचयति स्पष्टां स हारावलीं**

**होराशास्त्रविनिर्मलीकृतमनाः कल्याणवर्माकृतिः।।**

## ६.१२. लल्लाचार्यः

लल्लाचार्यः शाम्बाख्यस्य पौत्रः त्रिविक्रमस्य पुत्रः ५००मिते शके जातः। आचार्योऽयं दाक्षिणात्यः इति प्रतिभाति। अस्य हि शिष्यधीवृद्धिदम्, रत्नकोषः, जातकसारः ग्रन्थरत्नत्वेन गृह्यते। तत्राद्यः सिद्धान्तग्रन्थः, द्वितीयः संहिताग्रन्थः, तृतीयस्तु जातकग्रन्थः। अस्य देशकालस्थिविषये स्वयम् एवमाह --

**आसीदशेषबुधवन्दितपादपद्मस्तल्लब्धजो गुणवदह्नजविंशजन्मया**

**शाम्बस्ततोऽजनि जनेक्षणकैरवेन्दुभट्टास्त्रिविक्रम इति प्रथितः पृथिव्याम्।**

**लल्लेन तस्य तनयेन शशाङ्कमौलेः शैलाधिराजतनयादयितस्य शम्भोः**

**सम्पूज्य पादयुगमार्यभताभिधानं सिद्धान्ततुल्यफलमेतदकारि तन्त्रम्।।**

## ६.१३. श्रीपतिः

श्रीपतिः प्रसिद्धः दैवज्ञः ९०० तमे शकाब्दे जातः इति अनुमीयते। अयं केशवस्य पौत्रः नागदेवाख्यस्य पुत्रः इति रत्नमालटीकायां महादेववचनात् ज्ञायते। श्रीपतिः ज्योतिषस्य त्रिषुस्कन्धेषु च स्वीययोगदानं प्रददात्। अस्य सिद्धान्तशेखरः, धीकोटिकरणम्, पाटीगणितम्, बीजगणितमिति एते सिद्धान्तपक्षीयाः ग्रन्थाः। रत्नमाला

संहिताग्रन्थः। जातकपद्धतिः रमलपद्धतिश्च होराग्रन्थौ। अनेन ज्याखण्डसाधनं विनैव चापद्वारा ज्यासाधनं निर्दिष्टम्।

## ६.१४. प्रसिद्धज्योतिषग्रन्थकाराणां तत्प्रणीतग्रन्थानाञ्चसूची

| ग्रन्थकारः | स्थितिकालः | ग्रन्थाः |
|---|---|---|
| पितामहः | —— | पितामहसिद्धान्तः |
| सूर्यः | —— | सौरसंहिता |
| लगधः | १४०० श.पू. | वेदाङ्गज्योतिषम् |
| नारदः | —— | नारदसंहिता |
| अत्रिः | —— | अत्रिसंहिता |
| भृगुः | —— | भृगुसंहिता |
| वसिष्ठः | —— | वसिष्ठसंहिता |
| कश्यपः | —— | कश्यपसंहिता |
| पौलस्त्यः | —— | पौलस्त्यसंहिता |
| लोयशः | —— | लोयशसंहिता |
| शौनकः | —— | शौनकसंहिता |
| गर्गः | —— | गर्गसंहिता |
| पराशरः | —— | पराशरसंहिता |
| श्रीपतिः | ९०० | करणतिलकम्, रत्नमाला, जातकपद्धतिः, रमलपद्धतिः |
| भास्कराचार्यः | १०८२ | सिद्धान्तशिरोमणिः, करणकुतूहलम्, विवाहपटलः |
| बल्लालसेनः | १०९० | अद्भुतसागरः |
| नरपतिः | १०९० | नरपतिजयचर्चा |

| | | |
|---|---|---|
| महेन्द्रसूरिः | १२६० | यन्त्रराजः |
| वैद्यनाथः | १३५० | जातकपारिजातः |
| शाङ्र्गधरः | १४०० | मकरन्दकरणम् |
| **ग्रन्थकारः** | **स्थितिकालः** | **ग्रन्थाः** |
| केशवः (द्वितीयः) | १४१८ | ग्रहकौतुकम्, मुहूर्ततत्त्वम्, केशवीयजातकपद्धतिः, ग्रहचालनम्, गणितदीपिका |
| गणेशदैवज्ञः | १४४२ | ग्रहलाघवम् |
| रामचन्द्रः | १४२० | कल्पद्रुमकरणम् |
| दुण्डिराजः | १४६० | जातकाभरणम् |
| नृसिंहः | १४८० | मध्यमग्रहसिद्धिः |
| नारायणः | १४९३ | मुहूर्तमार्तण्डः |
| दिनकरः | १५०० | खेटकसिद्धिः |
| वेङ्कटेशकेतकरः | १८५० | ज्योतिर्गणितम् |
| सुधाकरः | १८२० | दीर्घकृतलक्षणम्, |
| विचित्रप्रश्नः, | —— | प्रतिभाबोधकम् |
| शङ्करबालकृष्णः | —— | भारतीयज्योतिषम् |
| मन्त्रेश्वरः | —— | फलदीपिका |
| पाराशरः | —— | बृहत्पराशरहोराशास्त्रम् |

## ६.१५. आदर्शप्रश्नाः

१. प्रसिद्धज्योतिषग्रन्थानां नामानि कविकालविषयं च लिखत।

२. सिद्धान्तशिरोमणि ग्रन्थकर्तृविषये लघुनिबन्धं लिखत।

३. ब्रह्मस्फुटसिद्धान्तमधिकृत्य लिखत।

## स्वावलोकनप्रश्नाः

१. पञ्चसिद्धान्तिका प्रणेतृविषये लिखत ?

२. लगधाचार्यमधिकृत्य लिखत ?

# ज्योतिषे आयुर्निरूपणम्

जीवितकालः आयुरित्यभिधीयते। जातकस्य आयुर्विज्ञानं ज्योतिःशास्त्रे महत्प्राधान्यं भजते।

**आयुश्च लोकयात्रा च शास्त्रेऽस्मिन् द्वे प्रयोजने।**
**विज्ञातुं को नु शक्नोति वसिष्ठो वा पराशरः।।**

इत्येवं प्रश्नमार्गकारः समुल्लिखति। होराशास्त्रस्य प्रजोयनद्वये आयुर्ज्ञानमेकं प्रयोजनं चेत् इतरफलज्ञानं द्वितीयम्। अत्र लोकयात्राशब्देन इतरफलं व्यवह्रियते।

**होरायाः इह जीवः स्यात् प्रष्टुरायुर्निरूपणम्।**
**देहः फलान्तरज्ञानमिति शास्त्रान्तरोदितम्।।** इति।

फलादेशशास्त्रस्य होराशास्त्रस्य च इतरफलज्ञानं देहरूपं चेत् पृच्छकस्य आयुर्निरूपणं जीवसदृशमिति शास्त्रान्तरे आयुर्निरूपणस्य प्राधान्यं प्रतिपाद्यते।

**स्वकर्म भोक्तुं जायन्ते प्रायेणैव हि जन्तवः।**
**क्षीणे कर्मणि चान्यत्र पुनर्गच्छन्ति देहिनः।।**

**पूर्वकर्मफलं भोक्तुं जन्तोर्यदिह जीवनम्।**
**आयुस्तत्कर्मशक्त्यास्य दीर्घमध्याल्पतादिकम्।।**

जन्मान्तरस्य प्रारब्धकर्मणः फलानुभवार्थं जन्तुः जन्म प्राप्नोति। कर्मफलानुभवार्थमायुषः अनिवार्यता। तदभावे जन्मान्तरसम्भवः। तेन च परमपुरुषार्थस्य मोक्षस्य सिद्धौ प्रतिबन्धकत्वम्। तस्मादायुषः प्राधान्यम्।

**आयुः पूर्वं परीक्षेत पश्चाल्लक्षणमादिशेत्।**
**निरायुषां तु मर्त्यानां लक्षणैः किं प्रयोजनम्।।**

कस्यापि जातकस्य फलविमर्शनात् प्राक् तस्यायुषः विचारः अवश्यं कर्तव्य इति शास्त्रकाराः समादिशन्ति। आयुषा हीनस्य जातकस्य महापुरुषराजयोगादीनां सद्भावे को वा लाभः? तादृशविशेषयोगानां फलानुभवार्थम् आयुस्तु अपेक्षितमेव। तस्मात् आदौ

जातकस्य आयुःप्रमाणं ज्ञात्वा ततः परम् अन्यफलादेशार्थं प्रवर्तनीयमिति विदुषामभिप्रायः।

**आद्वादशाब्दं नरयोनिजन्मनामायुष्कलाः निश्चयितुं न शक्यते।**
**मात्रा च पित्रा कृतपापकर्मणा बालग्रहैर्नाशमुपैति बालकः।।**
**आद्ये चतुष्के जननीकृताद्यैः मध्ये च पित्रार्जितपापसङ्घात्।**
**बालस्तदन्त्यासु चतुश्शरत्सु स्वकीयदोषैः समुपैति नाशम्।।**

कस्यापि शिशोः द्वादशवत्सरसमाप्तिपर्यन्तमायुः निश्चेतुं न शक्यते इति ज्योतिःशास्त्रमर्मज्ञाः आमनन्ति। जन्मादितः चतुर्षु वत्सरेषु मातृदोषात् ततः परं चतुर्षु वर्षेषु पितृदोषात् ततोऽन्तिमेषु चतुर्षु हायनेषु आत्मीयदोषवशाच्च शिशोः मरणं सम्भवेदिति शास्त्रसमयः। एवं पूर्वोक्तैः कारणैः द्वादशवत्सरेषु शिशुः यदा कदापि मरणं प्राप्नुयात्। तस्मात् द्वादशवत्सरसमाप्त्यनन्तरमेव बालकस्य आयुर्निर्णयः इति शास्त्रवचनम्।

**तद्दोषशान्त्यै प्रतिजन्मतारम् आद्वादशाब्दं जपहोमपूर्वम्।**
**आयुष्करं कर्म विधाय तातो बालं चिकित्सादिभिरेव रक्षेत्।।**

द्वादशवत्सरपर्यन्तं दोषपरिहारार्थं प्रतिजन्मनक्षत्रं दूर्वाहोम-मृत्युञ्जयहोम-जपादीनि आ ुर्युवर्धकानि कर्माणि विधाय प्रयत्नेन शिशुः रक्षणीयः संवर्धनीयः इति शास्त्रे प्रतिपाद्यते। रोगाणां सम्भवे समुचितौषधचिकित्सितादिभिः विशेषतया शिशुः परिपालनीयः। तस्मादेव जन्मकाले पूर्वोक्तादोषसूचकारिष्टयोगानां सद्भाने सूतकनिवृत्तिसमनन्तरमेव पञ्चमारिष्टशान्तिः समादिष्टा शास्त्रविद्भिः।

## स्वावलोकनप्रश्नः

१) आयुर्निर्णयं कियत् पर्यन्तं न कार्यम् ?

जातकस्य आयुर्निर्णयार्थं बहवः प्रकाराः शास्त्रेषु दिव्यदृग्भिराचार्यैः समभिहिताः। जन्मकालिकग्रहस्थितिवशात् आयुःसूचकाः योगाः जातके सम्भवन्ति। तान् परिशील्य

जातकस्य आयुर्निरूपणीयम्।

**ग्रहाणां स्थितिभेदेन पुरुषान् योजयन्ति हि।**

**फलैः कर्मसुद्भूतैरिति योगाः प्रकीर्तिताः।।**

जन्मकाले स्थिताः विभिन्नाः ग्रहयोगाः जन्मान्तरसमुत्पन्नैः कर्मफलैः मानवान् योजयन्तीति ज्योतिःशास्त्रस्य परमं रहस्यम्। एतादृशाः आयुःसूचकाः योगाः षड्विधाः प्रोक्ताः।

**योगायुः षड्विधं योगैः षड्विधैस्तान् वदाम्यहम्।**

**सद्योऽरिष्टा अरिष्टाख्या योगा रिष्टाह्वयास्तथा।।**

**मध्यदीर्घामितायुर्दा इति योगास्तु षड्विधाः।।**

१. सद्योरिष्टाः २. अरिष्टाः ३. रिष्टाः ४. मध्यायुर्दाः ५. दीर्घायुर्दाः ६. अमितायुर्दाः इति आयुःसूचकाः षड्विधाः ग्रहयोगाः ज्योतिःशास्त्रे प्रकीर्तिताः।

## स्वावलोकनप्रश्नः

**२) आयुःसूचकाः ग्रहयोगाः कतिविधाः? ते के ?**

______________________________

______________________________

______________________________

प्रत्येकं योगविशेषस्य आयुःप्रमाणमपि इत्थं निरूपितम् --

**सद्योरिष्टाह्वयाः योगाः वत्सरान्तर्मृतिप्रदाः।**

**रव्यब्दान्तरारिष्टाख्याः नापेक्षन्ते दशामिमे।।**

**योगा रिष्टाह्वयाः द्व्यष्टिवत्सरान्तर्मृतिप्रदाः।**

**अब्दानां सप्ततेरन्तर्योगा ये मध्यमायुषः।।**

**दीर्घायुषः शतस्यान्तः दशापेक्षान्वितास्त्रयः।**
**शताधिकसमा जीवेत् योगे जातोऽमितायुषि।।**

**आयुर्दायविधिं योगा नापेक्षन्तेऽमितायुषः।**

| | | |
|---|---|---|
| १. सद्योरिष्टयोगाः | - | वत्सरान्तर्मृतिप्रदाः |
| २. अरिष्टयोगाः | - | द्वादशवर्षान्तर्मृतिप्रदाः |
| ३. रिष्टयोगाः | - | द्वात्रिशंद्वर्षान्तर्मृतिप्रदाः |
| ४. मध्यायुषः योगाः | - | सप्ततिवत्सरान्तर्मृतिप्रदाः |
| ५. दीर्घायुषः योगाः | - | शतवर्षन्तर्मृतिप्रदाः |
| ६. अमितायुर्योगाः | - | शताधिकवर्षायुःप्रदाः |

एतेषां पूर्वोक्तानां योगानां लक्षणानि जातकग्रन्थेषु समुपलभ्यन्ते।

जातकस्य आयुर्निर्धारणार्थं अन्योऽपि प्रकारः शास्त्रे निरूप्यते। लग्नं देहः इत्यभिधीयते। अष्टमभावः जीवः इत्युदीर्यते। लग्नाष्टमपयोः सम्बन्धवशादपि आयुर्विचिन्त्यते।

**जन्मलग्नपयोः शत्रू निजाष्टमपती यदि।**
**समौ वा यदि वा बन्धू स्वल्पमध्यचिरायुषः।।**

जन्मलग्नाधिपतदष्टमाधिपौ यदि परस्परं शत्रू भवतः तर्हि जातकः अल्पायुः, तौ यदि समौ तर्हि मध्यायुः तथा यदि तौ सुहृदौ तर्हि दीर्घायुः इति च मन्तव्यम्। एवमेव जन्मराश्यधिपतदष्टमाधिपाभ्यां च आयुः निर्णेयम् इति शास्त्रकाराः समादिशन्ति।

**लग्नं विलग्नपतिमृत्युतदीशचन्द्राः**
**प्रष्ट्रायुषोऽवगमने खलु साधनानि।**
**तेषां शुभाशुभदृगन्वयवीर्यवत्ता**
**निर्वीर्यतादिगुणदोषवशात् विचिन्त्यम्।।**

इत्थं लग्नं, लग्नाधिपतिः, अष्टमस्थानम्, अष्टमाधिपतिः, चन्द्रः एतेषां पञ्चानां गुणदोषवशाच्च जातकस्य आयुर्निर्णेयमिति प्रश्नमार्गे अन्योऽपि प्रकारः समभिधीयते।

एतेषां पापान्तरस्थितिः, शुभेतरदृष्टियोगौ, अनिष्टस्थानस्थितिः, मौढ्यं, पापशत्रुगृहे स्थितिः - एते दोषाः। तेषां शुभमध्यस्थितिः, शुभदृष्टियोगौ, इष्टस्थानस्थितिः शुभमित्रगृहे स्थितिः - इमे च गुणाः। दोषाधिक्ये जातकस्य अल्पायुष्ट्वम् तथा च गुणाधिक्ये दीर्घायुष्ट्वम्, गुणदोषयोः साम्ये मध्यमायुष्ट्वम् च सम्भवति।

पूर्वोक्तैस्त्रिभिः प्रकारैः जातकस्य स्थूलम् आयुर्ज्ञानं सम्भवति। स्थूलायुर्ज्ञानं सम्पाद्य सूक्ष्मायुर्ज्ञानार्थं प्रयत्नो विधेयः। सूक्ष्मायुर्ज्ञानार्थं च बहवः प्रकाराः शास्त्रेषु समाख्याताः। गणितप्रक्रियामाश्रित्य सूक्ष्मायुःसाधनं शास्त्रे निरुक्तम्। अत्र तु ग्रहाणां बलाबलं विचिन्त्य समुचितप्रकारभेदः समाश्रयणीयः -

**पैण्डयं भानौ निसर्गप्रभवमुडुपतौ रश्मिजं सोमपुत्रे**
**भौमे भिन्नाष्टकवर्गोदितमसुरगुरौ कालचक्रोद्भवायुः।**
**देवाचार्ये दशायुर्दिनकरतनये सामुदायं बलिष्ठे**
**लग्ने यद्यंशकायुर्भवति बलयुते चाहुराचार्यमुख्याः।।**

पिण्डायुः, नैसर्गिकायुः, अष्टवर्गजायुः, रश्मिजायुः, दशायुः, कालचक्रजायुः, सामुदायजायुः, अंशकायुः इति गणितरीत्या सूक्ष्मायुःसाधने अष्टौ प्रभेदाः शास्त्रकारैः समादिष्टाः।

सूर्ये बलिष्ठे सति पिण्डायुः
चन्द्रे बलिष्ठे सति नैसर्गिकायुः
कुजे बलिष्ठे सति अष्टकवर्गजायुः
बुधे बलिष्ठे सति रश्मिजायुः
गुरौ बलिष्ठे सति दशायुः
शुक्रे बलिष्ठे सति कालचक्रजायुः
शनौ बलिष्ठे सति सामुदायजायुः
लग्ने बलिष्ठे सति अंशजायुः

इति सूर्यादीनां ग्रहाणां बलानुरोधेन पैण्डयादिप्राकारः सूक्ष्मायुःसाधने ग्राह्याः।

ग्रहाणां परमोच्चस्थितिवशात् विभिन्नानि आयुःप्रमाणानि सर्वत्र प्रकारेषु निरुक्तानि। नीचस्थितस्य ग्रहस्य कथितायुःवर्षसंख्यायाः अर्धमितानि वर्षाणि सम्भवन्ति। उच्चनीचयोर्मध्यस्थिते ग्रहे अनुपातेन आयुः कल्प्यम्। पुनश्च ग्रहस्य वक्रत्वे त्रिगुणं, मूलत्रिकोणस्थत्वे द्विगुणं च आयुः सम्भवति। तथा च ग्रहस्य अस्तादिस्थितिवशात् आयुषः ह्रासोऽपि अभिहितः। एवमेव द्वादशादिस्थानेषु विलोमेन स्थितिवशात् चक्रपातहानिश्च निरुक्ता। एवं लग्नसहितानां सर्वेषां ग्रहाणां यथाविधि आयुःसंसाध्य तेषां योगैक्यमितायुर्वर्षाणि जातकस्य आयुः निर्णीयते। यद्यपि अत्र बहुप्रकाराः निर्दिष्टाः तथापि सत्याचार्यसम्मतः अंशकायुर्दायपक्षः विशेषतया आद्रियते। वराहमिहिराचार्याः अपि अमुमेव पक्षं प्रमाणत्वेन स्वीकुर्वन्ति। अत्र प्रबन्धे सूक्ष्मायुः साधनक्रमः विस्तरभयात् न विशदतया प्रस्तूयते।

सूक्ष्मायुषभेदान् सप्रमाणं लिखतगणितरीत्या सूक्ष्मायुः संसाध्य ततः पश्चात् आनीतम् इदम् आयुः केषां समन्वेतीत्यत्र शास्त्रकाराः इत्थं विवृण्वन्ति --

**ये धर्मकर्मनिरताः द्विजदेवभक्ताः**
**ये पथ्यभोजनरताः विजितेन्द्रियाश्च।**
**ये मानवा धृतिसत्कुलशीलसीमाः**
**तेषामिदं कथितमायुरुदारधीभिः।।**

इति गणितानुरोधेन साधितस्य आयुषः अधिकारिणः के भवन्तीति सङ्कीर्तिताः।

**ये पापलुब्धाश्चोराश्च देवब्राह्मणनिन्दकाः।**
**सर्वाशिनश्च ये तेषामकालमरणं नृणाम्।।**

इति येषां च गणितनीतम् आयुः नान्वेतीति शास्त्रकाराः निगदन्ति। तस्मात् जातकस्य आयुश्चिन्तनावसरे सर्वेऽपि इमे विचाराः दैवज्ञेन अनुसन्धातव्याः।

**समा पष्टिर्द्विघ्ना मनुजकरिणां पञ्च च निशा**
**हयानां द्वात्रिंशत् खरकरभयोः पञ्चककृतिः।**
**विरूपा साप्यायुर्वृषमहिषयोर्द्वादश शुनां**
**स्मृते छागादीनां दशकसहिता षट् च परमम्।।**

इत्थं केषाञ्चित् जीविनां परमायुर्दायप्रमाणं समुल्लिख्य शास्त्रकाराः स्वीयं व्यवहारज्ञानं स्फुटं प्रदर्शयन्ति।

| | | |
|---|---|---|
| मानवानां गजानां | - | १२० वर्षाणि |
| अश्वानां | - | ३२ वर्षाणि |
| गर्दभकरभयोः | - | २५ वर्षाणि |
| वृषमहिषयोः | - | २४ वर्षाणि |
| शुनां | - | १२ वर्षाणि |
| अजादीनां | - | १६ वर्षाणि |

ज्योतिःशास्त्रे आयुःसाधनविधिः बहुविस्तृतरूपेण बहुषु ग्रन्थेषु विमृष्टो वर्तते। मय- यवन-शक्ति-देवल- जीवशर्मप्रभृतित्याचार्याः अपि स्वस्वमतानुरोधेन आयुःसाधनप्रकारान् अतानिषुः। सर्वाण्यपि मतानि विविच्य चतुरेण दैवज्ञेन शास्त्रसम्मतः अनुभवगम्यः पक्षः समाश्रयणीयः येन च फलादेशः अवितथः निर्दुष्टश्च स्यात् इति अलमितिविस्तरेण।

## स्वावलोकनप्रश्नः

**३) जीवीनां परमायुर्दाय प्रमाणं विशदयत ?**

______________________________

______________________________

______________________________

# मुहूर्तः

मुहूर्तशब्दोऽयं कालविशेषवाचकः। वेदकाले एव मुहूर्तः कालपरिमाणपर्यायान्तरेण व्यवहृतः संदृश्यते। अह्नः पञ्चदशो भागः मुहूर्तशब्देन व्यपदिश्यते। तथा रात्रेश्च। एवमाहत्य एकस्मिन् दिने त्रिंशत् मुहूर्ताः भवन्ति। अत्र प्रमाणीभूतानि वाक्यानि उपनिषद्ब्राह्मणादिषु गोचरीक्रियन्ते। यथा --

"**अथ यदाह। चित्रः केतुर्दाता प्रदाता सविता प्रसविताभिशास्तानुमन्तेति। एष एव तत्। एव ह्येव ते अह्नो मुहूर्ताः। एष रात्रेः।**" (तैत्तिरीयब्राह्मणे ३-१०-६)

शुक्लकृष्णपक्षभेदेन दिवारात्रिभेदेन च मुहूर्तानां पृथक् नामान्तराणि ब्राह्मणादिषूपलभ्यन्ते। यथा --

"**चित्रः केतुः प्रभानाभात्संभात्। ज्योतिष्मा, स्तेजस्वानातपः, स्तपन्निभितपात्। रोचनो रोचमानः शोभनः शोभमानः कल्याणः।।**" (तैत्तिरीयब्राह्मणे ३-१०-१)

इमानि भवन्ति शुक्लपक्षे दिवसस्य मुहूर्तनामानि। शुक्लपक्षस्य रात्रेस्तु मुहूर्ताः -

"**दाता प्रदाताऽनन्दो मोदः प्रमोदः। आवेशन्निवेशयन् संवेशनः सः, शान्तः शान्तः। अभवन् प्रभवन् संभवन् सम्भूतो भूतः।।**" (तैत्तिरीयब्राह्मणे ३-१०-१,२)

कृष्णपक्षे दिनस्य मुहूर्तनामानीमानि भवन्ति --

"**सविता प्रसविता दीप्तो दीपयन् दीव्यमानः। ज्वलन् ज्वलिता तपन् वितपन् सन्तपन्। रोचनो रोचमानः शुम्भूः शुम्भमानो वामः।।**" इति। (तैत्तिरीयब्राह्मणे ३-१०-१-२)

कृष्णपक्षस्य रात्रेर्मुहूर्ताः -

"**अभिशास्तानुमन्तानन्दो मोदः प्रमोदः। आसादयन् निषादन् स, सादनः सः, सन्नः। आभूर्विभूः प्रभूः शम्भूर्भुवः।।**" (तैत्तिरीयब्राह्मणे ३-१०-१-२)

प्रत्येकमुहूर्ते पञ्चदशसूक्ष्ममुहूर्ता अपि वर्तन्ते इत्ययमंश उपलभ्यते तैत्तिरीयब्राह्मणे। यथा --

"**अथ यदाह। इदानीं तदानीमिति। एष एव तत्। एष ह्येव ते मुहूर्तानां मुहूर्ताः।।**" (तैत्तिरीयब्राह्मणे ३-१०-६-६)

एषां प्रतिमुहूर्तानां नामानि अपि मन्त्रेषु निर्दिष्टानि उपलभ्यन्ते। यथा --

"**इदानीं तदानीमेतर्हि क्षिप्रमजिरम्। आशुर्निमेष फणोद्रवन्नतिद्रवन्। त्व, स्त्वरमाण आशुरशीयान् जवः।।**" इति। (तैत्तिरीयब्राह्मणे ३-१०-१-४)

अथर्वज्यौतिषेऽपि मुहूर्तशब्दः कालवाचकत्वेनोपलभ्यते। तेषां नामानि तथा च चतुर्षु अङ्गेषु मुहूर्तस्य स्थितिरपि कल्पिता दृश्यते। यथा --

**चतुर्भिः कारयेत् कर्म सिद्धिहेतोर्विचक्षणः।**
**तिथिनक्षत्रकरणमुहूर्तैरिति नित्यशः।।** इति।

निरुक्ते द्वितीयाध्याये पञ्चविंशतितमे खण्डे मुहूर्तक्षणनामककालपरिमाणयोर्नामानि निर्दिष्टानि सन्ति। एवमेव पाणिनीयव्याकरणे महाभारते च मुहूर्तशब्दोऽयं कालपरिमाणकत्वेनोल्लिखितः दरीदृश्यते।

## स्वावलोकनप्रश्नः

**३) मुहूर्तविषये तैत्तिरीयब्राह्मणे किमुक्तम् ?**

________________________________________

________________________________________

________________________________________

गच्छति काले मुहूर्तशब्दस्य अर्थव्याप्तिः बहुविस्तृता सञ्जाता। विवाहादिसंस्कार-विशेषास्तथा चान्यानेकव्यावहारिककर्मविशेषाश्च निर्दिष्टसमयानुरोधेन विहिता एवाभीप्सितफलदा भवन्तीति लोके लोकाः अनुमन्वते। तत्तत्कर्मानुरोधेन वारतिथिनक्षत्रादीनां

परस्परसंयोगेन अत्यन्तंगुणाधिक्यं दोषन्यूनत्वं च यस्मिन् काले प्रसिध्यति सः कालः मुहूर्तः इति व्यवहारः क्रमेण समभवत्। प्रथमतया संहिताग्रन्थेषु विविधकर्मोपयुक्तमुहूर्तानां वर्णनमुपलभ्यते। संहितास्कन्धस्य वैशाल्यकारणात् मुहूर्तानां बहूपयोग्यत्वात् च मुहूर्तः प्राधान्यमविन्दत। एवं ज्यौतिषे मुहूर्तः प्रत्येकभागत्वेन कल्पितः अभियुक्तैः।

## मुहूर्तस्य प्रयोजनम्

दिग्देशकालानुकूलकर्मैव यथार्थफलं प्रदत्ते, नान्यथा। बहूषूपकरणेषु सत्स्वपि, सततोद्योगे कृतेऽपि बहुकर्माणि अनिष्टफलप्रदानि भवन्तीति सार्वजनीनोऽयं विचारः। आकाशस्थसूर्यचन्द्रादिग्रहाणां किरणविशेषैः जगति वर्तमाना जन्तवः वस्तुविशेषाश्च प्रभाविता भवन्तीति आधुनिकाः अपि अनुमन्यन्ते। तेषां ग्रहनक्षत्रादीनां प्रभावः कदा कस्योपरि पतति, कश्च तत्परिणामः इत्यादिविषयान् यौगिकदृष्ट्या सञ्चिन्त्य पूर्वसूरयः लोकोपकारार्थं प्रत्येकं कर्मविशेषस्य करणे समुचितकालनिर्णयं बहुभिः प्रकारैरनुसन्धानैः महता प्रयत्नेन आविश्चक्रुः। तदर्थमेव फलैकेप्सुभिः मानवैः मौहूर्तिकैरुक्तकाले एव नित्यनैमित्तिककार्याणि अनुष्ठीयन्ते।

## लोके दैनन्दिनजीवने मुहूर्तस्य प्राधान्यम्

गर्भाधानादिसंस्कारविशेषेषु मुहूर्तानां प्राधान्यं सिद्धमेवास्ति। मानवस्य दैनन्दिनजीवने अपि मुहूर्ताः प्रमुखं स्थानमावहन्ति। लोकेऽस्मिन् अनुभववेद्योऽयं विषयः यत्पामरात् पण्डितपर्यन्तं सर्वोऽपि स्वस्वनित्यकार्येषु कालानुरोधेनैव कार्याणि अनुतिष्ठति। कृषिकः कर्षणार्थं, बीजवापनार्थं, फलकर्तनार्थं च निर्दिष्टकालमनुलक्ष्यैव प्रवर्तते। एवं क्रयविक्रयादिव्यवहारे, गृहप्रवेशनिर्माणादिषु, वापीतटाकादिखनने सुमुहूर्तमनुरुध्य जनः प्रारभते। प्रयाणौषधसेवनादिष्वपि कालस्यानुकूल्यं जनैरन्विष्यते। एतेन सामान्ये दैनिकव्यवहारे मुहूर्तस्य प्राधान्यं कियदस्तीति सुष्ठु अभिव्यज्यते।

## मुहूर्तग्रन्थेषु सामान्यतः प्रतिपाद्यमानविषयः

प्रत्येकं कर्मविशेषस्य फलावाप्यते शुभाशुभकालनिर्णयार्थमेव मुहूर्तग्रन्थाः प्रवृत्ता

इति प्रागेवोक्तम्। सामान्यतः मुहूर्तग्रन्थेषु तिथि-वार-नक्षत्रयोगकरणानां परस्परयोगवशात् शुभाशुभयोगास्तेषां तिथ्यादीनामधिदेवताश्च उच्यन्ते। त्याज्यप्रकरणम्, सङ्क्रान्तिविचारः, पुण्यकालनिर्णयः, प्रत्येकं सङ्क्रान्तिवशाच्छुभाशुभफलमित्यादीनि विचार्यन्ते मुहूर्तग्रन्थेषु। पुनश्च ग्रहगोचारविषयः, ग्रहाणां वेधस्थानानि, चन्द्रबलं, जन्मादिनवताराणां विचारः, ग्रहदोषनिवृत्यर्थं धार्यद्रव्याणि इत्याद्यपि विषयः प्रोच्यते।

गर्भाधानादिसंस्कारविशेषाणामुपयुक्तमुहूर्ताः, विवाहे वधूवरमेलापने कूटानि, गुरुशुक्रयोः बाल्यवृद्धत्वं, राजाभिषेकः, यात्राप्रकरणं, यात्रायां जनितदुष्टदोषाणां शान्तिः, वास्तुविचारः, गजादिविविधायानां स्वरूपकथनं, सौधनिर्माणविधिः इत्यादिविचाराश्च मुहूर्तग्रन्थेषु प्रस्तूयन्ते।

मुहूर्तग्रन्थेषु देशभेदेन तत्तद्देशानुष्ठानकर्मविशेषाणां मुहूर्ताः भिन्नाः भवन्ति। यतो हि अस्माकं देशे प्रदेशभेदेन आचार भेदोऽपि संदृश्यते। उत्तरभारतीयानां दक्षिणभारतीयानां वा सम्प्रदायविशेषकारणात् मुहूर्तग्रन्थेषु व्यत्यासः स्पष्टं भवति। दक्षिणेऽपि केरलीयमुहूर्तग्रन्थेषु किञ्चिद्वैलक्षण्यं गोचरीक्रियते।

## मुहूर्तग्रन्थानामितिहासः

मुहूर्तग्रन्थानामितिहासविषये दिङ्मात्रेणेह प्रस्तूयते। प्राचीनकाले मुहूर्तः संहिताविषयक एव आसीदिति प्रागेवोक्तम्। मुहूर्तः स्वतन्त्रभागत्वेन कदा स्थानमवापेति विचार्यमाणे वराहमिहिराचार्याणां कालानन्तरमेवेति समाधानं प्रसिध्यति। वरामिहिराचार्याणां बृहत्संहिताग्रन्थानन्तरं तादृशः संहिताग्रन्थः अन्यः नोपलभ्यते। इतः परमेव संहिताविषयेषु मुहूर्तः प्राधान्यं प्राप्य मुहूर्तविषयकग्रन्थानां रचनापरम्परा प्रारब्धा इति तर्क्यते। उपलभ्यमानेषु मुहूर्तग्रन्थेषु लल्लस्य रत्नकोशः प्रप्रथममुहूर्तग्रन्थः इति मौहूर्तिकैः कल्प्यते। लल्लः क्रिस्ताब्दे षष्ठे शतमाने व्यलसदिति इतिहासज्ञा अभिप्रयन्ति। मतमेतदवलम्ब्य मुहूर्तग्रन्थानाम् आरम्भकालः क्रिस्ताब्दषष्ठशतमानमिति निश्चिन्वन्ति। कालक्रमेण मुहूर्तविषये बहुग्रन्थाः प्रादुरभूवन्। मुहूर्तग्रन्थेष्वपि अत्यन्तमुपयोगयोग्यविचाराः स्थानम् अवापुः। तेन च लघुलघुतरग्रन्थानां रचनाक्रमः आरब्धः।

## स्वावलोकनप्रश्नः

२) मुहूर्तस्य प्राधान्यं लिखत ?

______________________________

______________________________

______________________________

### प्रसिद्धाः केचन मुहूर्तग्रन्थास्तत्प्रणेतारश्च

गच्छति काले मुहूर्तग्रन्थानां प्रचारः बहुविस्तृतरूपेण समभूत्। ज्यौतिषसाहित्ये मुहूर्तग्रन्थाः बहु उपलभ्यन्ते। अत्र केषाञ्चन प्रसिद्धमुहूर्तग्रन्थानां परिचयः सङ्ग्रहेण समुपस्थाप्यते।

| ग्रन्थनाम | ग्रन्थकर्ता | रचनासमयः शकवर्षेषु |
|---|---|---|
| रत्नकेशः | लल्लः | ५६० |
| रत्नमाला | श्रीपतिः | ९६१ |
| राजमार्ताण्डः | भोजः | ९६४ |
| विद्वज्जनवल्लभः | भोजः | ९६४ |
| अद्भूतसागरः | बल्लाळसेनः | १०९० |
| व्यवहारप्रदीपः | पद्मनाभः | १०८२ |
| ज्योतिर्विदाभरणम् | कालिदासः | ११६४ |
| विवाहवृन्दावनम् | केशवः | ११६५ |
| विवाहपटलः | शार्ङ्गधरः | १४०० |
| मुहूर्ततत्वम् | केशवः | १४२० |

| | | |
|---|---|---|
| विवाहपटलः | पीताम्बरः | १४४४ |
| ज्यौतिषदर्पणः | कञ्चपल्लुः | १४७९ |
| मुहूर्तमार्तण्डः | नारायणः | १४९३ |
| तोडरानन्दः | नीलकण्ठः | १५०९ |
| मुहूर्तचिन्तामणिः | रामदैवज्ञः | १५२२ |
| मुहूर्तचिन्तामणिः | शिवः | १५४० |
| मुहूर्तकल्पद्रुमः | विठ्ठलदीक्षितः | १५४९ |
| मुहूर्तदीपकः | महादेवः | १५८३ |
| मुहूर्तगणपतिः | गणपतिः | १६०७ |
| मुहूर्तमाला | रघुनाथः | १६६० |
| मुहूर्तसिन्धुः | गङ्गाधरशास्त्री | १७४४ |

## स्वावलोकनप्रश्नः

**३) तोडरानन्द ग्रन्थलेखकः कः ?**

______________________________

**४) मुहूर्तमालायाः प्रणेता ?**

______________________________

# ज्योतिश्शास्त्रे रोगचिन्तनम्

"**शरीरमाद्यं खलु धर्मसाधनम्**" इति कालिदासस्य वचनानुरोधेन धार्मिककर्मणां समुचितानुष्ठानार्थं स्वस्थं शरीरं परमावश्यकम्। शारिरिकं मानसिकं च स्वास्थ्यं विना मानवः किमपि महत्कार्यं साधयितुं न शक्नोति। मानवस्य शारीरिकं मानसिकं च स्वास्थ्यं तस्य जन्मान्तरीयशुभाशुभकर्मणां फलाधीनमिति ज्योतिश्शास्त्रे उपदिश्यते। जन्मान्तरकृतपापकर्मणां फलरूपेण शरीरे व्याधयः समुत्पद्यन्त इति प्रश्नमार्गकाराः समुपपादयन्ति।

**जन्मान्तरकृतं पापं व्याधिरूपेण जायते।**
**तच्छान्तिरौषधैर्दानैर्जपहोमार्चनादिभिः।।** इति।

ज्योतिश्शास्त्रे रोगहेतवः, रोगनिवारणार्थं प्रतिक्रियाः प्रभृति विषयाः विस्तरेणाभिहिताः। रव्यादयः ग्रहाः पञ्चभूतानाम्, अस्थ्यादिधातूनाम्, वातपित्तकफादित्रिदोषाणां च कारकाः इति ज्योतिश्शास्त्रे सर्वत्र ग्रन्थेषु प्रतिपाद्यत एव। पूर्वोक्तानां वैपरीत्यकारणात् शरीरे व्याधयः सञ्जायन्ते इति शास्त्रोऽस्मिन् प्रतिपाद्यते। रोगचिन्तनक्रमः ज्योतिश्शास्त्रानुरोधेन अत्र प्रस्तूयते।

**रोगास्तु द्विविधा ज्ञेयाः निजागन्तुकभेदतः।**
**निजाश्चागन्तुकाश्चापि प्रत्येकं द्विविधं पुनः।।**

**निजाः शरीरचित्तोत्थाः दृष्टादृष्टनिमित्तजाः।**
**तथैवागन्तुकाश्चैव व्याधयः स्युश्चतुर्विधाः।।** इति।

रोगाः प्रधानतया द्विविधाः निजाश्चागन्तुकाश्चेति। निजाः रोगाः शरीराः मानसाश्चेति पुनः द्विधा। आगन्तुका अपि रोगाः दृष्टनिमित्तजाः अदृष्टनिमित्तजाश्चेति द्विधा भवन्ति। एवमाहत्य रोहाश्चतुर्विधाः प्रोक्ताः।

**रोगाः**

**१) निजाः - शारीराः, मानसाः  २) आगन्तुकाः - दृष्टनिमित्तजाः, अदृष्टनिमित्तजाः**

शारीराः रोगाः कथं सञ्जायन्ते तथा च तेषां चिन्तनक्रम इत्थं निरूप्यते प्रश्नमार्गे --

**वातपित्तकफोद्भूताः पृथक्संसर्गजास्तथा।**
**सन्निपातभवाश्चैते शारीरा कीर्तिता गदाः।**
**अष्टमेन तदीशेन तद्द्रष्टा तद्गतेन वा।**
**विज्ञातव्याः स्युरेतेषां वीर्यतस्तत्कृता गदाः।।** इति।

वातपित्तकफानां त्रिदोषाणां वैपरीत्यकारणात् सम्भवाः रोगाः शारीराः इत्यभिधीयन्ते। इमे च शारीराः रोगाः अष्टमस्थानेन, अष्टमाधिपतिना, अष्टमभावद्रष्ट्रा, तथा अष्टमस्थेन ग्रहेण वा चिन्त्याः इति प्रश्नमार्गे प्रकीर्त्यते।

क्रोध -भय-दुःख-कामादिमनोविकारैः मानसाः रोगाः सम्भवन्ति। अष्टमाधिप-पञ्चमाधिपयोः परस्परं योगः, दृष्टिः, अन्योन्यकेन्द्रस्थितिः इत्यादिसम्बन्धवशात् मनोरोगाः विचिन्तनीयाः।

## स्वावलोकनप्रश्नः

**१) मनोरोगाः कथं विचिन्तनीयाः ?**

____________________________________________

____________________________________________

____________________________________________

**शापाभिचारघातादिजाताः दृष्टनिमित्तजाः।**
**ज्ञेयाः षष्ठतदीशाभ्यां तद्द्रष्ट्रा तद्गतेन च।।**
**रन्ध्रेशषष्ठसम्बन्धे शापाद्याः प्रबलाश्च ते।**
**अदृष्टहेतुजाः ज्ञेयाः बाधकग्रहसम्भवाः।।** इति।

आगन्तुकरोगा दृष्टनिमित्तजाः, अदृष्टनिमित्तजाः इति द्विधा भिद्यन्ते इति प्रागेवोक्तम्। दृष्टनिमित्तजाः रोगाः महात्मानां शापैः, शत्रुकृतैः अभिचारकर्मभिः वा अपघातादिभिर्वा सम्भवन्ति। इमे च रोगाः षष्ठभावात् तदीशेन, षष्ठभावस्थेन, तद्द्रष्ट्रा वा विज्ञातव्याः। अदृष्टहेतुजन्याः रोगाः बाधकग्रहाणां पीडाकारणात् सम्भवन्ति। अष्टमाधिपषष्ठाधिपयोः परस्परं योग-दृष्टि-केन्द्रस्थित्यादिसम्बन्धवशात् अदृष्टनिमित्तजाः रोगाः विचिन्त्याः। एवं विस्तृतरूपेण रोगभेदज्ञानोपायः ज्योतिश्शास्त्रग्रन्थेषु विस्तरेण समुपदिश्यते। रोगकारकग्रहाणां बहुधा कथनेन को वा ग्रहः रोगकारकः इति प्रश्नः समुदेति। तस्य समाधानार्थं ग्रहेषु तेषां स्थितिवशात् सुस्थग्रहाः दुःस्थग्रहाः इति भेदः प्रकीर्त्यते। दुःस्था ग्रहाः रोगं जनयन्ति, सुस्था ग्रहाः निरामयतनुं जातकं संसूचयन्ति।

**पापाः लाभतृतीयागाः सहजवैर्यन्त्याष्टमेभ्योऽन्यगाः**
**सौम्या मान्दिरपि त्रिकोणमृतिकेन्द्रेभ्योऽपरस्थिताः।**
**सर्वेऽमी कथयन्त्यनामयतनुं प्रष्टारमेवं स्थिताः**
**रोगग्रस्तकलेवरं च कथितेभ्योऽन्यत्र ते संस्थिताः।।** इति।

तृतीयैकादशस्थाः पापाः, तृतीयषष्ठाष्टमद्वादशभावेतरस्थाः शुभाः, लग्न-चतुर्थ-पञ्चम-सप्तमाष्टमनवम- दशमेतरभावेषु स्थितः मान्दिश्च पृच्छकस्य स्वस्थं शरीरं सूचयन्ति।

## स्वावलोकनप्रश्नः

२) **स्वस्थशरीरसूचक ग्रहस्थितिः ?**

______________________________________________

______________________________________________

______________________________________________

**षष्ठान्त्याष्टमदाम्बुलग्ननवमापत्येषु ये दुर्बलाः**
**पापा षष्ठमृतिव्ययेष्वपि शुभा दुःस्था भवन्ति ग्रहाः।**

**लग्नेशाध्यरयोऽतिरोगमृतिदाः दुःस्थेषु सुस्थाश्च ते -**

**ऽनुक्तस्थानगताः शशाङ्कसहिताः स्वं स्वं फलं कुर्वते।।** इति।

दुर्बलाः पापग्रहा लग्न-चतुर्थ-पञ्चम-षष्ठ-सप्तम-अष्टम-द्वादशभावस्थाः दुःस्था इत्यभिधीयन्ते। एतेषु यः लग्नेशस्य अधिशत्रुः सः रोगकारकः ज्ञेयः। एवं षष्ठ-अष्टम-द्वादशस्थाः शुभग्रहा अपि दुःस्थाः ज्ञेयाः। रव्यादिग्रहाः रोगकारकाः कीदृशरोगान् जनयन्तीति प्रश्नमार्गकारा इत्थं निर्दिशन्ति --

**पित्तं वातयुतं करोति दिनकृद्वातं कफं शीतगुः**

**पित्तं भूमिसुतस्तथा शशिसुतो वातं च पित्तं कफम्।**

**जीवो वातकफौ सितोऽनिलकफौ वातं च पित्तं शनिः**

**क्षीणेन्दुस्थितराशिनाथकथितं पूर्णः कफं तोयभे।।**

सूर्यादिग्रहेषु रोगकारकेषु तत्तद्ग्रहोक्तदोषविकारवशात् रोगान् कुर्वन्ति। सूर्यः वातपित्तरोगान्, चन्द्रः वातकफरोगान्, पित्तरोगान् कुजः, बुधः त्रिदोषजनितरोगान्, गुरुः वातकफजन्यरोगान्, शुक्रः वातकफजनितान्, शनिः वातपित्तजनितरोगांश्च कुर्वन्ति। क्षीणचन्द्रः निजराशिपतिसम्बद्धरोगान्, जलराशिगतः पूर्णचन्द्रः कफरोगांश्च जनयति।

## स्वावलोकनप्रश्नः

**३) ग्रहसम्बद्धरोगान् विशदयत ?**

______________________________

______________________________

______________________________

**रोगदायिषु खेटेषु तत्तत्प्रोक्तेषु धातुषु।**

**अपि रोगोद्भवो वाच्यः प्रोक्तं ग्रन्थान्तरे तथा।।** इति।

रव्यादिग्रहाणाम् अस्थ्यादिधातुषु यस्य सम्बन्धः कथितः तत्तद्धातुसम्बद्धः रोगो वाच्यः। उदाहरणार्थं यदि शनिः रोगकारकस्तर्हि सः स्नायुसम्बद्धान् रोगान् जनयति। रविः अस्थिसम्बद्धान् एवमन्येऽपि।

फलदीपिकायां मन्त्रेश्वरः रव्यादिग्रहकृतान् रोगान् इत्थं निर्दिशति --

१. पित्तोष्णज्वरतापदेहतपनापस्मारहृत्क्रोडज-
व्याधीन् व्यक्ति रविदृगार्त्यरिभयं त्वग्दोषमस्थिस्रुतिम्।। **रवेः।**

२. निद्रालस्यकफातिसारपिटकाः शीतज्वरं चन्द्रमाः
शृङ्ग्यब्जाहतिमग्निमान्द्यमरुचिं योषिद्व्यथाकामिलाः।। **चन्द्रस्य।**

३. तृष्णासृक्कोपपित्तज्वरमनलविषास्त्रार्तिकुष्ठाक्षिरोगान्
गुल्मापस्मारमज्जाविहतिपरुषतापामिकादेहभङ्गान्।। **कुजस्य।**

४. भ्रान्तिं दुर्वचनं दृगामयगलघ्राणोत्थरोगं ज्वरं
पित्तश्लेष्मसमीरजं विषमपि त्वग्दोषपाण्ड्वामयान्।। **बुधस्य।**

५. गुल्मान्त्रज्वरशोकमोहकफजान् श्रोत्रार्तिमोहामयान्
देवस्थाननिधिप्रपीडनमहीदेवेशशापोद्भवम्।। **गुरोः।**

६. पाण्डुश्लेष्ममरुत्प्रकोपनयनव्यापत्प्रमेहामयान्
गुह्यस्यामयमूत्रकृच्छ्रमदनव्यापत्तिशुक्लस्रुतिम्।। **शुक्रस्य।**

७. वातश्लेष्मविकारपादविहतिं चापत्तितन्द्राश्रमान्
भ्रान्तिं कुक्षिरुगन्तरूष्णभृतकध्वंसं च पार्श्वाहतिम्।। **शनेः।**

८. स्वर्भानुर्हृदि तापकुष्ठविमतिव्याधिं विषं कृत्रिमं
पादार्तिं च पिशाचपन्नगभयं भार्यातनूजापदम्।। **राहोः।**

इति सूर्यादिभिः सम्भाव्याः रोगाः विशदतया प्रकीर्तिताः। ग्रन्थान्तरेषु रोगनिर्णयार्थं बहवो मार्गाः समुपदिष्टाः। जन्मान्तरकृतं पापकर्मैव शरीरे व्याध्युद्भवस्य हेतुरिति कारणात् रोगाणां प्रशमनार्थम् औषधसेवनेन सह प्रायश्चित्तकर्माण्यपि विधातव्यानि, तदर्थमेव शास्त्रेषूक्तं "**तच्छान्तिरौषधैर्दानैर्जपहोमार्चनादिभिः**" इति। रोगस्य हेतुं ज्ञात्वा तदुचितप्रतिक्रियाश्च विहिताश्चेत् रोगः अवश्यमुपशाम्यतीति शास्त्रकाराणां दृढो विश्वासः।

# सङ्क्रान्तिविमर्शः

मेषादिषु द्वादशराशिषु क्रमेण सञ्चरतः सूर्यस्य पूर्वस्माद्राशेः उत्तरराशौ सङ्क्रमणं, प्रवेशः सङ्क्रान्तिः। प्रत्येकं ग्रहस्य राशिसञ्चारोऽपि सङ्क्रान्तिशब्देन अभिधातुं शक्यते। परन्तु सूर्येतरग्रहाणां बिम्बस्य सूक्ष्मत्वात् सङ्क्रान्तिकालः अल्पीयान् सम्भवति। तस्मात् सङ्क्रान्तिशब्देन सूर्यस्यैव राशिप्रवेशः गृह्यते। सूर्य आत्मा जगतस्तस्थुषश्च इति श्रुतिवचनानुरोधेन ज्योतिःशास्त्रे सूर्यः आत्मकारकत्वेन निर्दिश्यते।

**तेजसां गोलकः सूर्यः ग्रहर्क्षाण्यम्बुगोलकाः।**
**प्रभावन्तो हि दृश्यन्ते सूर्यरश्मिप्रदीपिताः।।**

इति सूर्यसिद्धान्तोक्त्या सूर्यकिरणैः इतरग्रहाणां ग्रहबिम्बानि प्रतिभासन्ते, न तेषां स्वयंप्रकाशः। तस्मात् ग्रहेषु प्रकाशकस्य ज्ञानस्वरूपस्य सूर्यस्यैव प्राधान्यम्। अत एव सूर्यस्य राशिप्रवेशरूपस्य सङ्क्रमस्य वैशिष्ट्यम्।

सूर्यः येन कालेन द्वादशराशीनां सञ्चारं पूरयति स कालः एकं सौरवर्षमित्यभिधीयते। तस्य द्वादशभागः एकः सौरमासः। सूर्यसञ्चारवशादेव दिवारात्रिभेदः ऋतुभेदश्च सञ्जायते।

सूर्यस्य प्रत्येकं राशिप्रवेशवशात् सङ्क्रान्तिनामान्यपि भिद्यते। तस्य मेषतुलाराशिसङ्क्रान्तिः विषुवत्सङ्क्रान्तिरिति कथ्यते, यतो हि मेषादौ तुलादौ च सूर्यः विषुवद्वृत्ते भ्रमति। तदा विषुवद्वृत्तमेव तस्य अहोरात्रवृत्तम्। तस्मात् तद्दिने दिवामानं रात्रिमानं च तुल्यतामेति। अत एव "समरात्रिं दिवे काले विषुवद्विषुवं च तत्" इत्याह अमरसिंहः। विषुवद्दिने एव सूर्यः समपूर्वदिशि उदेति। अन्यत्र दिनेषु किञ्चिद्व्यत्ययेन उदेति। ज्योतिश्शास्त्रे विषुवसङ्क्रान्तेः महत्प्राधान्यं वरीवर्ति। विषुवद्दिने मध्याह्ने द्वादशाङ्गुलशङ्कोश्छाया "पलभा" इत्यभिधीयते। अनया स्वदेशस्य अक्षांशः ज्ञायते। मेषादितः कन्यान्तं सञ्चरन् सूर्यः उत्तरगोलस्थस्तथा तुलादितः षड्राशिषु दक्षिणगोलस्थश्च भवति। उत्तरगोले स्थिते सूर्ये दिनमानस्य दक्षिणगोले रात्रिमानस्य चाधिक्यं प्रतीयते।

सूर्यस्य कर्कमकरराशिसङ्क्रान्ति अयनसङ्क्रान्तिरित्युच्यते। कर्कादितः

दक्षिणायनारम्भः मकरादितः उत्तरायणारम्भश्च सम्भवति। यतः कर्कादितः सूर्यस्य दक्षिणचलनं मकरादितः उत्तरचलनं चारभ्यते। अय गताविति धातोः ल्युटि निष्पन्नस्य अयनमिति शब्दस्य चलनमित्यर्थः। कर्कादौ मकरादौ च स्थितस्य सूर्यस्य क्रान्तिः परमा। नाडीवृत्तम् तस्य परममन्तरं तयोर्दिनयोः सम्भवति। **"दिनं सुराणामयनं यदुत्तरं निशेतरत् सांहितिकैः प्रकीर्तितम्"**

## स्वावलोकनप्रश्नः

**१) उत्तरदक्षिणानयोः आरभ्यः कदा ?**

________________________________________

________________________________________

________________________________________

उत्तरायणं देवानां दिनं दक्षिणायनं तेषां रात्रिरिति सांहितिकाः वदन्तीति भास्कराचार्याः स्वसिद्धान्तशिरोमणिग्रन्थे उल्लिखन्ति। एतद्विषये पुराणेषु प्रमाणान्यपि समुपलभ्यन्ते। उत्तरायणकालः विशेषतया शुभप्रद इति प्रशस्यते। उपनयनसंस्कारः, नूतनगृहप्रवेशः, राज्याभिषेकः इत्यादिविशेषकर्माणि उत्तरायणे एव शास्त्रेषु विहितानि।

वृषभ - सिंह - वृश्चिक - कुम्भराशयः स्थिरराशयः इत्यभिधीयन्ते। एतेषां चतुर्णां स्थिरराशीनां सङ्क्रान्तयः विष्णुपदीसङ्क्रान्तयः इति निरुच्यन्ते। मिथुन - कन्या - धनुर्मीनानां चतुर्णां द्विस्वभावराशीनां सङ्क्रान्तयः षडशीत्यानन सङ्क्रान्तय इत्याख्यायन्ते।

**तुलादिषडशीत्यहनां षडशीतिमुखं क्रमात्।**
**तच्चतुष्टयमेव स्यात् द्विस्वभावेषु राशिषु।।**

**षड्विंशे धनुषो भागे द्वाविंशेऽनिमिषस्य तु।**
**मिथुनाष्टादशे भागे कन्यायास्तु चतुर्दशे।।**

**ततः शेषाणि कन्यायाः यान्यहानि तु षोडश।**

**क्रतुभिस्तानि तुल्यानि पितॄणां दत्तमक्षयम्।।**

स्पष्टमिदं सूर्यसिद्धान्ते। अत्रायमाशयः - तुलादितः षडशीत्यंशैः धनुषः षड्विंशो भागः प्रथमं षडशीतिमुखम्। तस्मात् षडशीत्यंशैः मीनस्य द्वाविंशे भागे द्वितीयं षडशीतिमुखम्। ततः षडशीत्यंशैः मिथुनस्याष्टादशे भागे तृतीयं षडशीतिमुखम्। ततः परं षडशीत्यंशैः कन्यायाश्चतुर्दशे भागे अन्तिमं चतुर्थं षडशीतिमुखम्। एवं मिथुन - कन्या - धनु - मीनराशिषु षडशीत्याननसङ्क्रान्तिः सम्भवति। एवं चतुर्षु षडशीतिमुखेषु 4x86= 344 दिनानि जातानि। तेन एकस्मिन् सौरवर्षे षोडशदिनानि अवशिष्टानि। तेष्वेव दिनेषु कन्यां गते सवितरि पितॄणां विशेषतया पिण्डप्रदानादिकम् आस्तिकाः परिपालयन्ति। अयञ्च कालः पितृपक्षः इति प्रसिद्धः।

## स्वावलोकनप्रश्नः

**२) सङ्क्रान्तिः कति विधः ? विशदयत ?**

________________________________________

________________________________________

________________________________________

सूर्यस्य द्वादशराशिसङ्क्रान्तिवशात् षडर्तवः सम्भवन्तीति प्रागेवाभिहितम्।

**मृगादिशशिद्वयभानुभोगात् षडर्तवः स्युः शिशिरो वसन्तः।**

**ग्रीष्मश्च वर्षा च शरत्तथा च हेमन्तनामा कथितो मुनीन्द्रैः।।**

इति बृहज्जातके वराहमिहिरस्य वचनमिदम्। अत्रेत्थं विवरणम् - सूर्यस्य मकरकुम्भयोः सञ्चारकालः शिशिरः, मीनमेषयोर्वसन्तः, वृषमिथुनयोर्ग्रीष्मः, कर्कसिंहयोर्वर्षा, कन्यातुलयोः शरत्, वृश्चिक-धनुषोः सञ्चारकालः हेमन्त इति च षडर्तवः सम्भवन्ति।

सूर्यसङ्क्रान्त्युपलक्षिताः एव चैत्रादिचान्द्रमासाः शुद्धाः इति प्रख्यान्ति। मेषसङ्क्रान्तिविशिष्टश्चान्द्रमासः एव चैत्रः, एवं वृषभसङ्क्रान्तिविशिष्टश्चान्द्रः वैशाखः। एवमवशिष्टाः ज्येष्ठादयश्च क्रमेण मिथुनादिसङ्क्रान्तियुक्ता एव शुद्धाः भवन्ति। तेषु क्रियमाणानि कर्मविशेषाण्येव साफल्यं भजन्ते। यतो हि --

**अरुणः सूर्यो भानुस्तपनश्चन्द्रो रविर्गभस्तिश्च।**

**अर्यमा हिरण्यरेता दिवाकरो मित्रविष्णू च।।**

इति कालमाधवोक्तदिशा अरुणादिद्वादशादित्या मघादिषु मासेषु क्रमेण उदयन्ति। निस्सूर्यो मासः अधिमास इत्युच्यते।

**यस्मिन् मासे न सङ्क्रान्तिः सङ्क्रान्तिद्वयमेव वा।**

**मलमासः स विज्ञेयो सर्वकर्मसु गर्हितः।।**

इति माधवाचार्योक्त्यनुसारं यस्मिन् चान्द्रमासे सूर्यसङ्क्रान्तिर्न भवति सः अधिमासः यस्मिंश्च सङ्क्रान्तिद्वयं भवति स मासः क्षयमासः इति च अभिधीयते। उभावप्यधिमासक्षयमासौ मलमासाविति व्यवह्रियेते।

**असङ्क्रान्तिमासोऽधिमासः स्फुटः स्यात्**

**द्विसङ्क्रान्तिमासः क्षयाख्यः कदाचित्।**

**क्षयः कार्तिकादित्रये नान्यदा स्यात्**

**तदा वर्षमध्येऽधिमासद्वयं च।।**

इति सिद्धान्तशिरोमणौ भास्कराचार्याः अधिमासलक्षणं प्रतिपादयन्ति। यस्मिन् वर्षे क्षयमासः (द्विसङ्क्रान्तिमासः) आपतति तस्मिन् क्षयमासात्पूर्वं एकोऽधिमासः परञ्च अन्यः अधिमासः सम्भवति। तदा ते मासाः क्रमेण संसर्प अंहस्पति अधिमासा इति नाम्ना व्यवह्रियन्ते। क्षयमासात् प्राक् पतितः अधिमासः संसर्पसंज्ञां भजते। क्षयमासस्तु कार्तिकादित्रये एव सम्भवति। यतो हि वृश्चिकादिराशित्रये एव सौरमासप्रमाणं चान्द्रमासात् अल्पं भवितुमर्हति। अन्यत्र न जातुचित् सम्भवति।

## स्वावलोकनप्रश्नः

३) मलमासविचारं निरूपयत ?

______________________________

______________________________

______________________________

दिननक्षत्रयोगात् सङ्क्रान्तीनां पृथक् नामान्तराणि मुहूर्तग्रन्थेषु व्यपदिश्यन्ते। रविवासरे उग्रनक्षत्रेषु वा सूर्यसङ्क्रान्तिः "**घोरा**" पदवाच्या। एवं चन्द्रवासरे लघुनक्षत्रेषु वा ध्वांक्षी, कुजवासरे चरनक्षत्रेषु महोदरा, बुधवासरे मित्रनक्षत्रेषु वा मन्दाकिनी, गुरुवासरे स्थिरनक्षत्रेषु मन्दा, शुक्रवासरे मित्रनक्षत्रेषु मिश्रा, शनिवासरे तीक्ष्णनक्षत्रेषु राक्षसी इति च वासरनक्षत्रयोगात् सङ्क्रान्तयः विभिन्नैः नामभिः व्यवदिश्यन्ते।

अयं सङ्क्रान्तिकालः अत्यन्तं पुण्यतम इति भारतीयधर्मशास्त्रग्रन्थेषु बहुधा निरूप्यते।

**सङ्क्रान्तौ यानि दत्तानि हव्यकव्यानि दातृभिः।**
**तानि नित्यं ददात्यर्कः पुनर्जन्मनि जन्मनि।।**

**रविसङ्क्रमणे पुण्ये न स्नायाद्यदि मानवः।**
**सप्तजन्मसु रोगी स्यात् दुःखभागिह जायते।।**

इत्येवं माधवाचार्याः सूर्यसङ्क्रान्तिपुण्यकाले स्नान - दान- पितृतर्पणादि कर्माणि अवश्यमनुष्ठेयानीति प्रतिपादयन्ति। अत एव एषः सूर्यसङ्क्रान्तिपुण्यकालः अवश्यं निर्णेयः। सङ्क्रान्तिकालनिर्णयविचारः अत्यन्तं गहनः। राशिभेदात्, दिवारात्रिभेदेन च सङ्क्रान्तिसम्भवे पुण्यकालोऽपि भिद्यते।

सूर्यस्य पूर्वराशितः उत्तरराशिप्रवेशः सङ्क्रान्तीरिति प्रागेवोक्तम्। वृत्ताकारेण स्थितं सूर्यबिम्बं येन कालेन पूर्वापरराशिसन्धिबिन्दुं सङ्क्रामति स कालः सङ्क्रान्तिपुण्यकालः।

एष च कालः अनुपातेन संसाध्यते। इष्टग्रहदिनगत्या यदि ६० घटिकाः लभ्यन्ते तर्हि बिम्बकलाभिः कति घट्यः इत्यनुपातेन सङ्क्रान्तिपुण्यकालः सम्भवति। सूर्यस्य मध्यमबिम्बप्रमाणं ३२ कलाः। मध्यमदिनगतिः स्वल्पान्तरेण ६० कलाः। तदा -- 60x32/ 60= 32.

अतः द्वात्रिशंत् घटिकाभिः सूर्यबिम्बं राशिसन्धिबिन्दुं सङ्क्रामति। तस्मात् सूर्यबिम्बकेन्द्रस्य राशिसन्धिबिन्दुसङ्क्रमणात् प्राक् परतश्च षोडशघटिकाः पुण्या इत्यभिधीयन्ते। यदि मध्यरात्रिकाले सूर्यसङ्क्रान्तिः स्यात् तदा पूर्वदिनं परदिनं च दिनद्वयं पुण्यं सम्भवति।

सङ्क्रान्तिपुण्यकालनिर्णयविषये मुहूर्तग्रन्थेषु धर्मशास्त्रीयग्रन्थेषु च महान् विमर्शः प्रवर्तते। सङ्क्रान्तिपुण्यकालनिर्णयविषये एव एक महान् प्रबन्धो भवितुमर्हति। विस्तरभयात् नात्र स विचारो विशदतया प्रस्तूयते।

# प्रश्नशास्त्रम्

**वेदास्तावद्यज्ञकर्मप्रवृत्ताः यज्ञाः प्रोक्तास्ते तु कालाश्रयेण।**

**शास्त्रादस्मात् कालबोधो यतः स्याद्वेदाङ्गत्वं ज्यौतिषस्योक्तमस्मात्।।**

वेदविहितानां यागादिक्रियाकलापानां निर्वहणार्थं समुचितकालं निर्दिशतीत्यतः ज्योतिःशास्त्रस्य वेदाङ्गत्वमभिहितम्। '**साङ्गो वेदोऽध्येयो ज्ञेयश्चेति**' यथोपदेशस्तथा ज्योतिःशास्त्रमपि साङ्गमध्येतव्यम्।

**स्कन्धत्रयात्मकं ज्योतिःशास्त्रमेतत् षडङ्गवत्।**

**गणितं-संहिता-होरा चेति स्कन्धत्रयं मतम्।।**

**जातकगोलनिमित्तप्रश्नमुहूर्ताख्यगणितनामानि।**

**अभिदधतीह षडङ्गान्याचार्याः ज्यौतिषे महाशास्त्रे।।**

गणितं - संहिता - होरेति स्कन्धत्रयेण प्राधान्येन विभक्तस्यास्य शास्त्रस्य जातक-गोल-निमित्त-प्रश्न-मुहूर्त- गणितमिति षडङ्गमित्यभिधीयते। ज्योतिःशास्त्रस्य षडङ्गेष्वन्यतमस्य प्रश्नशास्त्रस्य वैशिष्ट्यमत्र किञ्चित् प्रस्तोष्यते।

सति जातके प्रश्नस्य का वा आवश्यकता? जन्मकालिकग्रहस्थितिं विज्ञाय पूर्वार्जितकर्मविशेषाणां सर्वमपि शुभाशुभफलजातं समादेष्टुं जातकमेव पर्याप्तं, कुतः प्रश्नः इति जिज्ञासा उदीयात्। बहुभिः स्वजन्मकालः न ज्ञायते। कदाचित् किमपि अमूल्यं वस्तु नष्टं, चौर्यं सञ्जातम्, ग्रामदेवालये जीर्णत्वकारणात् देवप्रतिमाया अज्ञानात् पुनः प्रतिष्ठार्थं कस्य वा देवस्य प्रतिमा प्रतिष्ठाप्या? वर्तमानकाले अनुभूयमानस्य दैहिकमानसिकश्रमस्य किं कारणम्? कश्च परिहारोपायः? इत्यादि जिज्ञासया पृच्छकः ज्योतिर्विदं समाप्नोति। तदा प्रश्नशास्त्रमेव प्रश्नानामेतेषां समाधानं वक्ति।

**कस्य पक्तिरिति ज्ञातुमिदानीं पूर्वकर्मणाम्।**

**इहार्जितञ्च विज्ञातुं कर्मप्रश्नो विधीयते।।**

सम्प्रति अनुभूयमानं शुभाशुभं कर्मफलं प्राग्जन्मार्जितं वा अस्य जन्मनः कर्मफलं वेति विज्ञाने प्रश्नकर्मावश्यकम्। तत् ज्ञानप्रकारः यथा प्रश्नमार्गे निरूप्यते --

**यदा जातकतः प्रश्नो गुणदोषैर्विभिद्यते।**
**तदा शुभाशुभं विद्यात् कर्मभेदैरिहार्जितैः।।**

**यदानुसरति प्रश्नो जातकं ग्रहभादिभिः।**
**तदा प्राक्कर्मपाकः स्यादित्याद्यूह्यं हि धीमता।।**

प्रश्नकालिकं लग्नं चन्द्राधिष्ठितराशिः, ग्रहस्थितिः इत्यादिषु ये गुणाः दोषाश्च ते जन्मकालिकं लग्नं चन्द्राधिष्ठितराशिः ग्रहस्थितिः एतत् प्रभृतिभिश्च विभिद्यन्ते चेत् इहजन्मनि कृतस्य कर्मविशेषस्य फलं, तेषां परस्परं साम्ये सति प्राग्जन्मार्जितकर्मफलं पृच्छकेन सम्प्रत्यनुभूयत इति च समादेश्यम्।

मानवस्य जन्मकालः यथा दैवाधीनस्तथैव पृच्छाकालोऽपीति प्रश्नशास्त्रे निरूप्यते --

**सम्प्रेर्यमाणस्त्ववशः शरीरी प्रसह्य दैवेन शुभाशुभेन।**
**ज्योतिर्विदः सन्निधिमेति यस्मात् प्रश्नोऽप्यतो जन्मसमः फलेषु।।**

दैवप्रेरणयैव शुभाशुभफलजिज्ञासुः पृच्छकः ज्योतिर्विदः समीपं यातीति कारणात् प्रश्नकालस्य जन्मकालसमत्वं प्रश्नमार्गकारः समर्थयति। फलादेष्टुर्दैवज्ञस्य गुणलक्षणादीनि प्रश्नमार्गे विशदीक्रियन्ते। यथा --

**ज्योतिःशास्त्रविदग्धो गणितपटुः वृत्तवांश्च सत्यवचाः।**
**विनयी वेदाध्यायी ग्रहयजनपटुश्च भवतु दैवज्ञः।।**

**अनेकहोरातत्त्वज्ञः पञ्चसिद्धान्तकोविदः।**
**ऊहापोहपटुः सिद्धमन्त्रो जानाति जातकम्।।**

ऊहापोहपटुत्वं सिद्धमन्त्रत्वं, वाग्मित्वं प्रभृति गुणाः प्रश्नचिन्तायां विशेषेण सहकुर्वन्ति।

**जन्मलग्नतया प्रश्नलग्नं संकल्प्य पण्डितः।**

**जातके यद्यदुद्दिष्टं तत्तत् प्रश्नेऽपि चिन्तयेत्।।**

जन्मकालिकलग्नवशात् यथा द्वादशभावादिप्रकल्पनद्वारा फलचिन्तनं क्रियते तथैव प्रश्नलग्नवशादपि फलं विचारणीयमिति प्रश्नशास्त्रकारणामाशयः। प्रश्नशास्त्रे फलनिर्देशार्थं बहुविकल्पाः विनिर्दिष्टाः।

१. तत्काललग्नम् २. दैवज्ञस्य श्वाससञ्चारः ३. पृच्छकस्य स्थितिः, स्पर्शः, चेष्टा, भावः, दुष्टिः, धृतं वस्त्रं, आभरणं, तद्वर्णश्च ४. पृच्छाप्रदेशः ५. तत्कालजातानि निमित्तानि ६. पृच्छकाद्युच्चारितवर्णः ७. आरूढाराशिः। पूर्वोक्तानामेषां शुभाशुभं विज्ञाय चतुरमतिना दैवज्ञेन फलं निर्देष्टव्यम्।

तत्काललग्नम् -- पृच्छाकाले यो राशिः पूर्वक्षितिजं स्पृशति सः राशिः तत्काललग्नमित्युदीर्यते, तदनुरोधेन ग्रहस्थितिं विज्ञाय पृच्छकस्य शुभाशुभफलं समादिश्यते दैवज्ञेन।

## दैवज्ञस्य श्वाससञ्चारः

दैवज्ञेन प्रातरूत्थाय प्रतिदिनं स्वीयश्वासपरीक्षा विधेया। एवं प्रश्नकालेऽपि। आत्मीयश्वासवायुसञ्चारवशात् इडा-पिङ्गला-सुषुम्नादिभेदान् पृथिव्यादिपञ्चभूतसम्बन्धमपि जानीयात्। वामनासापुटात् वायुनिर्गमे इडानाडीसञ्चारः, दक्षिणनासापुटात् वायुनिर्गमे पिङ्गलानाडीसञ्चारः, उभयोरपि घ्राणयोः समानतया वायुर्निर्गमे सुषुम्नानाडीसञ्चार इति च व्यपदिश्यते। एतेषां क्रमेण रविः, चन्द्रः, अग्निश्च अधीशा भवन्ति। शुभग्रहाणां वासरेशु इडावायुसञ्चारः, अशुभग्रहाणां वासरेषु पिङ्गलानाडीसञ्चारः पृच्छकस्य शुभफलं सूचयति। वायोर्विलोमसञ्चारे सति अशुभफलं समादेश्यम्।

**श्वासस्य प्रतिकूलता यदि दिने भनोर्वपुर्वेदना**
**शीतांशोः कलहः कुजस्य मरणं दूरप्रयाणं विदः।**
**राज्यापत् धिषणस्य शुक्रदिवसे कार्यस्य कस्यापि नो**
**सिद्धिर्मन्ददिने स्ववीर्यकृषिनाशेलाविवादादयः।।**

इति ख्यादिवासेषु निषिद्धवायुसञ्चारवशात् फलं निरूप्यते। श्वासस्य दैर्ध्यवशात् तस्य पृथिव्यादिभूतसम्बन्धोऽपि वेद्यः।

**मेदिन्याः खलु षोडशाङ्गुलमपां दैर्ध्यं दिनेशाङ्गुलं**
**वह्नेर्दन्तिमिताङ्गुलं मरूत एतद्व्यूनमग्न्यङ्गुलम्।**
**आकाशस्य च वेद्यमेतदुदितं भूम्यादिभूतात्मकं**
**स्वीयश्वासगतिप्रमाणमुभयोरेतत्समं घ्राणयोः।।**

श्वाससञ्चारात् पञ्चभूतसम्बन्धोऽत्र विव्रियते। नासिकाग्रे दक्षिणहस्तं संस्थाप्य श्वासवायोर्दैर्ध्यं विज्ञेयम्। यदि श्वासदैर्ध्यं षोडशाङ्गुलमितं प्रतिभाति चेत् तस्य पृथिवीभूतसम्बन्धः, द्वादशाङ्गुलमितं चेत् जलभूतसम्बन्धः, अष्टाङ्गुलमितं चेत् अग्निभूतसम्बन्धः षडङ्गुले सति वायुभूतसञ्चारः, अङ्गुलत्रये च दैर्ध्ये आकाशभूतसम्बन्धश्च कल्प्यः।

## स्वावलोकनप्रश्नः

**१) दैवज्ञेन किं किं विचिन्त्य फलं वक्तव्यम् ?**

________________________________________

________________________________________

________________________________________

"**शिखिभूखपयोमरूद्गणानां वशिनो भूमिसुतादयः क्रमेण**" इत्यनेन कुजादीनां ग्रहाणाम् अग्न्यादिभूतसम्बन्धो निरूप्यते बृहज्जातके। विशिष्य रोगप्रश्ने, नष्टप्रश्ने च श्वासस्य पञ्चभूतसम्बन्धवशात् फलं समादिश्यते। 'रोगान् कुर्युः ग्रहाः स्वोक्तपञ्चभूतवशादपि।' इति प्रश्नमार्गे रोगप्रश्ने ग्रहाणां पञ्चभूतसम्बन्धात् रोगनिर्णयप्रकारः निरूप्यते, पञ्चभूतसम्बद्धा रोगास्तु रोगप्रश्ने विस्तरेणाभिधीयन्ते।

नष्टप्रश्ने श्वासवायुनिर्गमेन फलम् --

**भूमौ निखातमवनेरूदये जलेऽपां वातस्य धूमवति खस्य तथोर्ध्वदेशे।**

**भूपृष्ठगं हुतभुजः खलु वस्तु नष्टं ब्रूयात् कृतेह यदि नष्टपदार्थचिन्ता।।**

नष्टवस्तुचिन्तायां श्वासवायोः पृथिवीभूतसम्बन्धे सति नष्टं वस्तु भूमौ निक्षिप्तमिति समादेश्यम्। जलसम्बन्धे जले, आकाशभूतोदये उन्नतप्रदेशे, अग्नि भूतोदये भूपृष्ठे रहस्यदेशे तथा च वायुभूतसम्बन्धे सति धूमयुक्तप्रदेशे च नष्टवस्तुनः स्थितिर्वाच्या।

गर्भप्रश्ने श्वासवायुफलम् --

**गर्भिणीदर्शने वायुर्दक्षिणे चेत् पुमान् वधूः।**

**गर्भस्था वामभागे चेत् द्वयोर्नो चेदसत्प्रजा।।**

दैवज्ञस्य दक्षिणभागे वायुसञ्चारकाले दक्षिणे एव पृच्छकस्य गर्भिण्याः वा स्थितिश्चेत् पुरूषसन्तानं वामनासापुटात् वायुसञ्चारकाले वामे पृच्छकस्य स्थितिश्चेत् स्त्रीसन्तानं स्यात्। अन्यथा वायुसञ्चाररहितदेशे पृच्छकस्थित्या गर्भनाशं प्रवदेत्।

**वायोराकाशसञ्चारः गर्भस्य मृतिसूचकः।**

**पृष्ट्वा सवायावन्यत्र स्थितौ चासत्प्रजां वदेत्।।**

## स्वावलोकनप्रश्नः

**२) नष्टप्रश्ने श्वासवायुनिर्गमफलं लिखत ?**

________________________________________

________________________________________

________________________________________

वायोराकाशसञ्जारः गर्भप्रश्ने गर्भस्थशिशोर्मरणं सूचयति। दैवज्ञस्य वायुसञ्चारभागे स्थित्वा सन्ततिप्रश्नं कृत्वा पृच्छकः समनन्तरमन्यत्र तिष्ठति चेत् अपि गर्भहानिर्वाच्या। निमात्तानां फलम् --

**गर्भिण्यर्भकदर्शनं घनरवो विद्वन्द्वयुद्धं तथा**
**स्पृष्टः प्रष्टुरथो भुजापदनसां कस्यापि चाकर्षणम्।**
**आरूढे यदि वोदये युतिदृशौ पुत्रे युतिर्वा भृगोः**
**गर्भोऽस्तीति वदेच्च दशसु सत्येतेषु कस्मिन्नपि।।**

गर्भप्रश्ने सति तत्काले गर्भिणीदर्शनं, शिशोदर्शनम् उच्चैर्ध्वनिः, पक्षिणोः द्वन्द्वयुद्धं, पृच्छकेन हस्तपादनसां स्पर्शः कस्यापि वस्तुनः समीपमाकर्षणम् एतानि निमित्तानि तथा आरूढे शुक्रस्थितिर्दृष्टिर्वा, शुक्रेण युक्तं दृष्टं वा लग्नं, आरूढात् उदयात् वा पञ्चमे शुक्रस्थितिः इत्यादियोगाश्च गर्भस्य स्थितिं सूचयन्ति।

**प्रश्नानन्तरमाशुदूरगमनं कस्यापि वान्यस्य वा**
**तत्रागम्य गतिर्द्रुतं मलपरित्यागश्च कर्णादितः।**
**ताम्बूलेष्वपि पञ्चमस्य दळनं प्रष्टा वितीर्णेष्विह**
**व्यासङ्गश्च शवस्य पञ्च गदिता गर्भस्रुतेः सूचकाः।।**

प्रश्नानन्तरं शीघ्रमेव प्रश्नप्रदेशात् पृच्छकस्य अन्यत्र गमनं, प्रश्नकाले आगतस्य कस्यचित् तत्प्रदेशादन्यत्रगमनं, कर्णादितः मलत्यागः, पृच्छकेन आनीतेषु ताम्बूलेषु पञ्चमस्य विदलनं, प्रश्नप्रदेशे कस्यचित् शवदर्शनम् इत्यादीनि निमित्तानि गर्भपातसूचकानि। प्रश्नानुरोधेन निमित्तानां फलानि दैवविदा सन्तर्क्याणि।

प्रश्ने अङ्गस्पर्शफलम् --

**प्रष्टा वक्षोदेशे स्पृशेत्तर्हि क्षिप्रमीप्सितं लभते।**
**मङ्गलवस्तूनि च तथा विपरीतफलममङ्गलस्पर्शे।।**

पृच्छकः स्वोरःस्थानं, दर्पणताम्बूलकुङ्कुमफलप्रभृति मङ्गलद्रव्याणि स्पृशन् पृच्छति

चेत् शुभफलमादेश्यम्। रज्जु - भस्म - रक्तकुसुमप्रभृति अमङ्गलवस्तूति स्पृशति चेत् तर्हि अभीप्सितं न सिध्यति।

**संस्पृशन् नाभिनासास्यकेशरोमनखद्विजम्**
**गुह्यपृष्ठनखग्रीवाजठरानामिकाङ्गुलीः।**
**रन्ध्राणामपि नवकं करपदयोस्तलं च सर्वपर्वाणि**
**प्रष्टा लभतेऽनिष्टं निम्नस्पर्शे तथैव विज्ञेयम्।।**

इत्येवं श्लोकोक्तशरीरावयवानां स्पर्शेन अनिष्टं फलं समादेश्यम्। सन्ततिप्रश्ने पृच्छकः दक्षिणहस्तेन स्वशरीरस्य दक्षिणभागं स्पृशन् पृच्छति चेत् पुंसन्तानं, वामहस्तेन वामभागं स्पृशति चेत् स्त्रीसन्तानं च वाच्यम्।

## स्वावलोकनप्रश्नः

**३) प्रश्ने अङ्गस्पर्शफलं लिखत ?**

______________________________

______________________________

______________________________

**स्पर्शो दक्षिणबाहुवक्षशिरसां पाणिग्रहे सिद्धिकृत्।**
**जान्वङ्घ्र्योस्तु विलम्बकृत् परकरे स्पृष्टे कटौ विघ्नकृत्।।**

पृच्छकस्य दक्षिणबाहुवक्षशिरसां स्पर्शः विवाहप्रश्ने विवाहसिद्धिं संसूचयति। शरीरस्य अधोऽवयवस्पर्शेन वामहस्तस्पर्शेन च विवाहभङ्गः सूच्यते।

**वासन्तीतरलोहितार्तवसमालोके च कण्डूयन**
**प्रेक्षायामसृगीक्षणे च भविता विघ्नो रजोनिर्गमात्।**
**आरावश्रवणे लुलायगजयोः रक्तार्तवलोकने**
**रेखायां यदि चक्रमध्यरचिताम्भोजे न्यसेद्वा पणम्।।**

**विश्लेषः करयोः कयोरपि शवालोके मृतिप्रेक्षणे**
**व्याहन्येत करग्रहः कलहवागाकर्णनेऽपि ध्रुवम्।।**

पृच्छाकाले रक्तकुसुमानां दर्शनं, कण्डूयनप्रेक्षा, रक्तदर्शनं, रजोनिर्गमनं, महिषगजयोराक्रन्दनं, युक्तयोः करयोर्विश्लेषः शवदर्शनम् इत्यादीनि निमित्तानि विवाहविघ्नजनकानि सम्भवन्ति।

## आरूढराशिनिर्णयः

'आरूढत्वात् पृच्छकेन राशिरारूढ उच्यते' इति आरूढराशेर्निवचनं प्रश्नमार्गे समुपलभ्यते। प्रश्नकर्ता जनेन दैवज्ञस्य समीपं सम्प्राप्य यत् प्रदेशे उपविश्यते तेन आरूढराशिः निर्णीयते, दैवज्ञस्य परितः पूर्वादिदिक्षु मेषादिराशयः कल्प्यन्ते, यथा पूर्वस्यां मेषवृषौ, आग्नेयकोणे मिथुनं, दक्षिणे कर्कसिंहौ, नैरृत्यकोणे कन्या, तुलावृश्चिकौ पश्चिमे, वायव्ये धनुः, उत्तरस्यां मकरकुम्भौ, ईशान्यकोणे मीनं च। पृच्छकः यस्यां दिशि उपविशति तद्दिग्राशिः आरूढाराशिरिति निर्णीयते। तत्काललग्नराशिवत् आरूढराशिवशाच्च फलं निर्दिश्यते। तत्काललग्नस्य राशिं युक्त्वा अंशादिकं आरूढराशौ योज्यम्। तदा आरूढस्फुटमुपलभ्यते। अनेन कदाचित् आरूढनिर्णयः न सम्भवति चेत् तदा तज्ज्ञानार्थमन्येऽपि विकल्पाः अभिहिताः प्रश्नशास्त्रे।

प्रष्टुरङ्गस्पर्शवशादपि आरूढराशिं निश्चिन्वन्ति दैवज्ञाः। पृच्छाकाले पृच्छकः स्वशरीरस्य यमवयवं स्पृशति तस्यावयवस्य यो राशिरभिहितः होराशास्त्रे स राशिः आरूढराशिरिति निर्णीयते। शिरः - मुखं - उरः - हृदयं - उदरं - कटिः - वस्ति - गुह्यादेशः - ऊरू - जानू - जङ्घे - अङ्घ्री इत्येतानि अङ्गानि मेषादिराशीनां सूचकानि भवन्ति। पृच्छाकाले पृच्छकस्य शिरःस्पर्शेन मेषराशिः आरूढराशिरिति निर्णीयते। एवमन्येषाम् अवयवानां स्पर्शेन तदवयवोक्तराशयः आरूढराशित्वेन कल्प्याः। पृच्छकाद्युच्चरितवर्णवशादपि आरूढराशिचिन्तनप्रकारः समभिधीयते ज्योतिःशास्त्रे। विस्तारभयात् नात्राधिकं प्रस्तूयते। पृच्छकः ज्यौतिषज्ञानशून्यश्चेत् अन्योऽपि कश्चित् प्रकारोऽभिधीयते आरूढराशिनिर्णये।

दैवज्ञेन राशिचक्रं विलिख्य पृच्छकहस्ते स्वर्णं दत्वा राशिचक्रे कुत्रचित् स्वर्णनिक्षेपार्थं पृच्छकः सूचनीयः। यत्र राशौ पृच्छकः स्वर्णं निक्षिपति स राशिरारूढराशिरिति निर्णीयते। एवमारूढराशिं निर्णीय शुभाशुभफलनिर्देशः विधीयते।

स्थालीपुलाकन्यायेन प्रश्नशास्त्रस्य परिचयोऽत्र प्रस्तुतः। शास्त्रमिदं बहुविस्तृतं, सागरगभीरं परमरहस्यं च वरीवर्ति। प्रश्नशास्त्रं विना फलनिर्देशः परिपूर्णः न भवति। जातकं परिशील्यं प्रश्नवशादपि शुभाशुभं विज्ञाय फलमादिशन्ति दैवज्ञाः। प्रश्नशास्त्रमधिकृत्य बहवः ग्रन्थाः समुपलभ्यन्ते। 'प्रश्नमार्गः' 'देवकेरलम्' 'षट्पञ्चाशिका' 'होराकृष्णीयम्' इत्यादयः केचित् प्रसिद्धाः प्रश्नशास्त्रग्रन्थाः।

# उपनयनमुहूर्तः

मानवजीवनस्य समग्रविकासार्थं नैके उपायाः प्राचीनैरस्मदाचार्यैः परिकल्पिताः। न केवलम् आध्यात्मिकविकासार्थम् अपि तु भौतिकविकासार्थमपि मार्गोपायाः समुपदिष्टास्तैराचार्यवर्यैः। मानवस्य मानसिक - शारीरिक - आध्यात्मिकविकासाः संस्काराणामधीनाः। यैः कर्मभिः विशुद्धः सन् मानवः मोक्षपदस्य अधिकारी सम्भवति ते संस्काराः इत्यभिधीयन्ते, स्वस्वजातेः मर्यादानुरोधेन सामान्यविशेषैः वैदिकैश्च कर्मभिः आत्मानं विशुद्ध्य मानवः मोक्षाधिकारी सञ्जायते। एतेषु संस्कारेषु अन्यतमः उपनयनसंस्कारः। उपनयनम् वटोः द्वितीयं जन्म इत्युदीर्यते। वेदाध्ययनाधिकारसिध्यर्थं बालकस्य उपनयनयसंस्कारः विधीयते। जन्मकालिकग्रहस्थितदोषाः उयनयनकालिकसुमुहूर्तवशात् नश्यन्तीति कारणात् उपयनयमुहूर्तस्य बहुप्राधान्यं विद्यते। तस्मात् सर्वप्रयत्नेन उपनयनार्थं सुमुहूर्तः अन्वेष्टव्यः।

**विप्राणां व्रतबन्धनं निगदितं गर्भाज्जनेर्वाष्टमे**
**वर्षे वाप्यथ पञ्चमे क्षितिभुवां षष्ठे तथैकादशे।**
**वैश्यानां पुनरष्टमे च पुनः स्यात् द्वादशे वत्सरे**
**कालेऽथ द्विगुणे गते निगदिते गौणं तथाहुर्बुधाः।।**

इति मुहूर्तचिन्तमणौ बाह्मणादिवर्णानाम् उपनयनस्य योग्यकालः निर्दिश्यते।

ब्राह्मणानां गर्भाज्जन्मतो वा अष्टमे पञ्चमे वा वर्षे, क्षत्रियाणाम् एकादशे षष्ठे वा वर्षे तथा वैश्यानां द्वादशे अष्टमे वा वर्षे उपनयनं श्रेष्ठं भवति। विहितकालात् द्विगुणितवर्षपर्यन्तम् उपनयनस्य गौणः कालः।

अष्टमे वर्षे ब्राह्मणमुपनयीत्। गर्भाष्टमे वा इति आश्वलायनगृह्यसूत्रवचनानुरोधेन ब्राह्मणस्य जन्माष्टमे गर्भाष्टमे वा वर्षे उपनयनस्य मुख्यः कालः।

**गर्भाष्टमे कुर्वीत ब्राह्मणस्योपनायनम्।**
**गर्भादेकादशे राज्ञो गर्भाच्च द्वादशे विशः।।**

इति मनुस्मृतेः वचनानुरोधेन ब्राह्मणस्य अष्टमे क्षत्रियस्य एकादशे वैशस्यस्य द्वादशे च वर्षे उपनयनस्य मुख्यः कालः इति स्वीक्रियते।

**आषोडशात् ब्राह्मणस्य सावित्री नातिवर्तते**

**आद्वाविंशात् क्षत्रबन्धोशचतुर्विंशतेर्विंशः।**

**अति ऊर्ध्वं त्रयोऽप्येते यथाकालमसंस्कृताः**

**सावित्री पतिता व्रात्या भवन्त्यार्यविगर्हिता।।**

इति मनुवचनानुरोधेन ब्राह्मणस्य षोडशवत्सरात् परं क्षत्रियस्य द्वाविंशात् परं तथा वैशस्य च चतुर्विंशतिवर्षेभ्यः परं व्रात्यदोषो जायते। एवमतीतिकाले विहितेन उपनयनेन अभीप्सितं प्रयोजनं न जायते।

## स्वावलोकनप्रश्नः

**१) ब्राह्मणादीनाम् उपनयनकालं लिखत ?**

________________________________________

________________________________________

________________________________________

**ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पञ्चमे।**

**राज्ञो बलार्थिनः षष्ठे वैश्यस्यार्थार्थिनोऽष्टमे।।**

इति ब्राह्मणादिवर्णानां क्रमेण पञ्चम - षष्ठ - अष्टम् वर्षेषु विशेषतया काम्योपनयनम् विधीयते। मुख्यकालादन्यत्र उपनयनार्थं गुरुबलमपेक्षितम्।

**वटुकन्याजन्मराशेस्त्रिकोणायद्विसप्तगः।**

**श्रेष्ठो गुरुः खषट्त्र्याद्ये पूजयान्यत्र निन्दितः।।**

वटोः जन्मराशितः चारवशात् द्वितीय-पञ्चम-सप्तम-नवम-एकादशस्थ गुरुः श्रेष्ठः स्यात्। तृतीय-षष्ठ-दशम जन्मराशिस्थः मध्यमः। मध्यमगुरुः शान्त्या उत्तमो भवति। चतुर्थ-अष्टम-द्वादशस्थः गुरुः सर्वथा निन्द्यः। यदि गुरुः स्वोच्चे, स्वनवांशे, स्वमैत्रे, स्वक्षेत्रे चेत् तदा निन्दितस्थानेषु स्थितेऽपि गुरौ उपनयनं न दोषयेति अपवादोऽपि विद्यते।

उपनयनार्थम् उत्तरायणकालः एव विहितः। उत्तरायणेऽपि वसन्तर्तुः विशेषतया उपनयने श्रेष्ठः। ब्राह्मणस्य वसन्तः, क्षत्रियस्य ग्रीष्मः तथा वैश्यस्य शरत् च श्रेष्ठा इति क्वचित् विधीयते। "**वसन्ते ब्राह्मणमुपनयीत**" इति वेदवाक्यं श्रूयते।

## उपनयनमुहूर्तः

**क्षिप्रध्रुवाहिचरमूलमृदुत्रिपूर्वारौद्रेऽर्कविद्गुरुसितेन्दुदिने व्रतं सत्।**

**द्वित्रीषुरुद्रविदिक्प्रतिमे तिथौ च कृष्णादिमत्रिलवेऽपि न चापराह्णे।।**

इति मुहूर्तचिन्तामणौ क्षिप्र - ध्रुव - चर - मृदु आश्लेषा - मूलं, पूर्वात्रयं तथा आर्द्रा इमानि द्वाविंशतिनक्षत्राणि उपनयने विहितानि। पुनर्वसुनक्षत्रम् उपनयने सर्वथनिषिद्धमिति राजमार्तण्डः समामनति। रविबुधगुरुशुक्रवासराः। तिथयः - द्वितीया, तृतीया, पञ्चमी, दशमी, एकादशी, द्वादशी तथा च कृष्णपक्षे द्वितीया, तृतीया, पञ्चमी च। क्वचित् षष्ठी - सप्तमी - त्रयोदशी च विहिताः। ब्राह्मणानां रविवासरः, क्षत्रियाणां कुजवासरः, वैश्यानां बुधवासरः इति विशेषतया प्रशस्ताः।

**चन्द्रतारानुकूलेषु ग्रहाब्देषु शुभेष्वपि।**

**पुनर्वसौ कृतो विप्रः पुनः संस्कारमर्हति।।** इति।

उपनयनार्थं चैत्रमासः अत्यन्तं प्रशस्त इति रत्नकोशादिषु कीर्त्यते।

**गोचराष्टकवर्गाभ्यां यदि शुद्धिर्नलभ्यते।**

**तदोपनयनं कार्यं चैत्रे मीनगते रवौ।।**

पुनः --

**हरौ सिंहांशके जीवे नीचर्क्षे नीचभागगे।**

**मौञ्जीबन्धः शुभः प्रोक्तः चैत्रे मीनगते रवौ।।**

गोचार - अष्टवर्गेषु अननुकूलेषु, सिंहस्थ गुरौ तथा गुरौ नीचराशौ नीचभागगेऽपि मीनस्थिते रवौ चैत्रमासे उपनयनस्य प्राशस्त्यं बृहस्पतिरपि समादिशति।

## स्वावलोकनप्रश्नः

२) उपनयनमुहूर्तविचारः लिखत ?

___

___

___

### उपनयने लग्नम्

**व्रतबन्धेऽष्टषड्रिःफवर्जिताः शोभनाः शुभाः।**

**द्विषडाये खलाः पूर्णो गोकर्कस्थो विधुस्तनौ।।**

उपनयनलग्नात् षष्ठाष्टद्वादशवर्जिताः शुभग्रहाः, तृतीयषष्ठायस्थिताः पापाश्च शुभाः भवन्ति। लग्नस्थः पूर्णचन्द्रः वृषभराशिस्थः अथवा कर्कस्थश्चेत् उपनयने शुभः सञ्जायते -- "**शाखेशवारतनुवीर्यमतीवशस्तम्**" इति वचनानुरोधेन शाखेशग्रहस्य वासर-राशिलग्नबलं तत्तच्छाखीयानां विशेषतया शुभदं भवति।

शाखाधिधिपत्यं इत्थं निरूपितम् --

**ऋग्वेदस्य - गुरुः** **यजुर्वेदस्य - शुक्रः**

**सामवेदस्य - कुजः**

**अथर्ववेदस्य - बुधः**

उदाहरणार्थं ऋग्वेदीयानां गुरुवासरे धनुर्मीनराशिलग्नगते गुरौ बलिष्ठे च सति उपनयनं शुभदं भवति। एवमेव इतरशाखागतानां चिन्त्यम् --

**जन्मर्क्षमासलग्नादौ व्रते विद्याधिको भवेत्।**

**आद्यगर्भेऽपि विप्राणां क्षत्रादीनाम् अनादिमे।।**

उपनयने जन्मनक्षत्रं, जन्ममासः, जन्मलग्नं च ब्राह्मणानां निषिद्धं न भवति। एतेषु उपनयने सति वटुः विद्यावान् भवतीति शौनके सङ्कीर्त्यते।

## उपनयने निषिद्धकालः

**कृष्णे पक्षेऽनध्याये शनौ निश्यपराह्णके।**

**प्राक्सन्ध्यागर्जिते नेष्टो व्रतबन्धो रालग्रहे।।**

दक्षिणायनम्, कृष्णपक्षः, अनध्यायदिनानि, शनिवासरः, रात्रिः, अपराह्णकालः, मेघगर्जनयुक्तप्राक्सन्ध्याकालः तथा गलग्रहतिथयः उपनयने निषिद्धाः भवन्ति।

## गलग्रहतिथयः

**त्रयोदश्यादि चत्वारि सप्तम्यादिदिनत्रयम्।**

**चतुर्थी चैकतः प्रोक्ता अष्टावेते गलग्रहाः।।**

चतुर्थी, सप्तमी, अष्टमी, नवमी, त्रयोदशी, चतुर्दशी, अमा इमाः गलग्रहतिथयः इत्यभिधीयन्ते।

## अनध्यायः

**शुचिशुक्रपौषतपसां दिगश्विरुद्रार्कसङ्ख्यकचसिततिथयः।**

**भूतादित्रितयाष्टमिसंक्रमणं च व्रतेष्वनध्यायाः।।**

आषाढशुक्लदशमी, ज्येष्ठशुक्लद्वीतीया, पुष्यशुक्लएकादशी, माघशुक्लद्वादशी, चतुर्दशी, अमा, प्रतिपत्, अष्टमी, सङ्क्रान्तिः एतानि दिनानि उपनयने अनध्यायसंज्ञानि

भवन्ति। प्रदोषदिनान्यपि उपनयने त्याज्यानि भवन्ति।

**अर्कतर्कत्रितिथिषु प्रदोषः स्यात्।**

**रात्र्यर्ध-सार्धप्रहर-याममध्यस्थितैः क्रमात्।।**

द्वादश्यां रात्र्यर्धात् पूर्वं त्रयोदशी, षष्ठ्यां रात्रौ अर्धप्रहरात् पूर्वं सप्तमी तथा तृतीयायां रात्रौ प्रथमप्रहरे चतुर्थी चेत् प्रदोषः सम्भवति, इमानि प्रदोषदिनान्यपि उपनयने निषिद्धानि।

एतदतिरिच्य अन्येऽपि केचन विचाराः उपनयनमुहूर्तप्रसङ्गे विभिन्नेषु ग्रन्थेषु प्रकीर्तिताः। तस्मात् कालस्य शुभाशुभं सर्वं विविच्य उपनयनमुहूर्तः अन्वेष्टव्यः।

## स्वावलोकनप्रश्नः

३) उपनयने निषिद्धकालं लिखत ?

______________________________

______________________________

______________________________

# कुजदोषविचारः

विशालाकाशे निरन्तरं सञ्चरणशीलैर्ग्रहैः समस्तमपि चराचरं वस्तु प्रभावितं भवतीति वेदकालादेव महर्षिभिरुपपादितम्। सूर्याचन्द्रमसोः प्रभावस्तु कीदृश इति सामान्येनापि जनेनानुभूयत एवानुदिनम्। सूर्यकिरणमन्तरा सस्योत्पत्तिः फलोत्पत्तिश्च न सम्भवतीति यदधुनातनैर्विपश्चिद्भिः प्रतिपाद्यते तत्तु प्राचीनकाले एव दिव्यदृग्भिराचार्यैः साक्षात्कृतमिति स्पष्टं विज्ञायते अस्माकमार्षग्रन्थानामध्ययनेन। एवं सर्वेषामपि ग्रहाणां प्रभावविशेषः दृढीकृतः स्वीयानुसन्धानैः प्राचीनभारतीयज्योतिर्विद्भिः। तेषां ज्योतिर्विदां बहुविधानामनुसन्धानाना-मनुभवप्रसूतं फलमेवास्ति भारतीयं ज्योतिश्शास्त्रम्। जन्मकाले विशिष्टस्थानस्थिताः ग्रहाः कर्मसमुद्भूतैः फलैः पुरुषान् योजयन्तीति शास्त्रस्यास्य विशिष्टं तत्त्वमस्ति --

**पूर्वजन्मार्जितं कर्म शुभं वा यदि वाशुभम्।**
**तस्य पक्तिं ग्रहाः सर्वे सूचयन्तीह जन्मनि।।**
**सुखदुःखकरं कर्म शुभाशुभमुहूर्तजम्।**
**जन्मान्तरेऽपि तत्कुर्यात् फलं तस्यान्वयेऽपि च।।**

इत्याचार्यैरुपदिश्यते प्रश्नमार्गे ग्रन्थे। सूर्यादयो ग्रहाः पृथिव्यादिपपञ्चभूतानाम्, अस्थ्यादिसप्तधातूनां, वातपित्तकफानां च कारकाः, तस्मात्ते जन्मकाले आत्मीयबलाबलवशात् पाञ्चभौतिकं मानवशरीरं प्रभावयन्तीति ज्योतिश्शास्त्रे प्रतिपाद्यते।

**एते ग्रहाः बलिष्ठाः प्रसूतिकाले नृणां स्वमूर्तिसमम्।**
**कुर्युर्देहं नियतं बहवश्च समागता मिश्रम्।।**
**गुरुशशिरवयः सत्त्वं रजः सितज्ञौ तमोऽर्कसुतभौमौ।**
**एतेऽन्तरात्मनः स्वां प्रकृतिं जन्तोः प्रयच्छन्ति।।**

इति। स्थिते चैव विवाहसमये वधूवरयोः परस्परं ग्रहानुकूल्यमवश्यमन्वेष्टव्यमेव। यतो हि विवाहस्तु वधूवरयोः परस्परं शरीरमनसोः अपि चोभयोः कुटुम्बयोश्च सम्मिलनरूपः भवति तस्मादेव विवाहात् पूर्वं वधूवरयोः जातकयोः परस्परं साम्यं चिन्त्यते। यत्रानुकूल्यं

दम्पत्योस्त्रिवर्गस्तत्र वर्धते इति याज्ञवल्क्यवचनाच्च। आधुनिकेऽपि काले पाश्चात्यदेशेषु वधूवरयोः रक्तपरीक्षा विधीयते विवाहात् पूर्वमित्यपि श्रूयते। वधूवरयोः जातकमेलापनेऽपि वैज्ञानिकं विशिष्टं तत्त्वमस्तीति विज्ञायते। विवाहे कुजदोषः विशिष्टं स्थानमावहति। पुरुषस्य योषितो वा जन्मकालिककुजस्थितिः विवाहस्य साफल्ये महत्प्राधान्यं भजत इति बहुत्र जातकग्रन्थेषु प्रस्तूयते। वधूवरयोः जन्मकाले तत्तत्स्थानस्थितः कुजः परस्परं दोषाय भवतीति प्रतिपाद्यते च ज्योतिर्विद्भिराचार्यैः। अत्र किं कुजस्यैव प्राधान्यं स्यात् कीदृशः कुजः दोषाय भवति के अपवादाः कश्च परिहारः इत्यादिविषयमधिकृत्य किञ्चित् प्रस्तूयते। यतो हि कुजदोषनिर्णये जनाः बहु संशेरते जिज्ञासन्ते च।

कुजदोषनिरूपकाः बहवः प्रमाणभूताः श्लोकाः मुहूर्तग्रन्थेषु जातकग्रन्थेषु च समुपलभ्यन्ते।

**लग्ने व्यये च पाताले जामित्रे अष्टमे कुजे।**
**कन्या भर्तृविनाशाय भर्तुः कन्या विनश्यति।।**

इति बृहद्दैवज्ञरञ्जने कुजदोषो निरूप्यते। बृहज्जौतिषसाराख्ये ग्रन्थे तु --

**लग्ने व्यये चतुर्थे च सप्तमे चाष्टमे कुजः।**
**भर्तारं नाशयते भार्या भर्ता भार्यां विनाशयेत्।।** इति।

वधूवरयोः अन्यतरस्य जन्मकाले लग्न-चतुर्थ-सप्तम-अष्टम-द्वादशस्थानेषु अन्यतमस्थानस्थितः कुजः अपरं नाशयतीति तात्पर्यम्।

**धनावसानस्मरयानरन्धगो धरासुतो जन्मनि यस्य दारहा।**
**तथैव कन्याजनजन्मलग्नतो यदि क्षमासूनुरनिष्टदः स्यात्।।**

इति जातकपारिजाते द्वितीयस्थितस्यापि कुजस्य दुष्टत्वमभिधीयते। यवनजातके तु जन्मलग्नात्, चन्द्रात् तथा शुक्राच्च कुजदोषो विचारणीय इत्युदीर्यते। एवं लग्नं, चतुर्थं, सप्तमं, अष्टमं, द्वादशयमिति यद्यपि षट्स्थानानि कुजजोषनिरूपणे प्रोक्तानि तथापि बालवैधव्ययोगनिरूपणावसरे षष्ठस्थितस्यापि कुजस्य महान् दोषः समुपपादितः।

**जन्मलग्ने यदा चन्द्रः तस्मात्षष्ठेऽष्टमे कुजः।**
**वर्षाष्टमे नरो याति यमालयमपुत्रकः।।**
**पापयुक्तो यदा चन्द्रात् षष्ठे चाष्टमगे यदि।**
**विवाहसमयात् मृत्युं दद्यादष्टाब्दतस्तयोः।।**
**द्व्यादिपापयुते भौमे सप्तमे चाष्टमे स्थिते।**
**बालवैधव्ययोगः स्यात् कुलनाशकरी वधूः।।**

इति कुजदोषनिरूपकाः श्लोकाः बहुत्र ग्रन्थेषु समुपलभ्यन्ते। अत्र प्रश्नः उदेति किं कुजस्य वैशिष्ट्यम् ? कुजस्यैव किमर्थं तावत्प्राधान्यमाचार्यैरुपदिष्टम् ? इति। तस्मात् कुजस्य स्वरूपं किञ्चिदत्र विचार्यते। विभिन्नैराचार्यैः कुजस्य स्वरूपम् इत्थं निरूपितं स्वस्वग्रन्थेषु --- "**क्रूरदृक्तरुणमूर्तिरुदारः पैत्तिकः सुचपलः कृशमध्यः।**" इति वराहमिहिरः कुजस्वरूपं निर्दिशति बृहज्जातके।

वैद्यनाथस्तु जातकपारिजाते -- "**क्रूरेक्षणस्तरुणमूर्तिरुदारशीलः पित्तात्मकः सुचपलः कृशमध्यदेहः।।**" इति।

**क्रूरो रक्तारुणो भौमश्चपलोदारमूर्तकः।**
**पित्तप्रकृतिकः क्रोधी कृशमध्यो द्विजिह्वकः।।**

इति च पराशरः कुजस्वरूपं व्याख्याति।

"**कोपाग्निनेत्रः सितरक्तगात्रः पित्तात्मकः चञ्चलबुद्धियुक्तः**" इति च ग्रन्थान्तरे। इत्थं समेषामाचार्याणां मतानुरोधेन कुजस्तु पित्तप्रकृतिकः, क्रोधी, चपलः, मज्जासारः, क्रोधेक्षणः, ज्वलिताग्निः, तामसश्चेति निश्चिनुमः। तस्मात् जन्मकाले स्वकीयबलानुरोधेन कुजः स्वीयगुणान् जातकस्य प्रददातीति तु स्पष्टमेव। कुजस्यापरमपि वैशिष्ट्यं ज्योतिश्शास्त्रे निर्दिश्यते। स्त्रीणां मासिकरजःस्रावे पित्तप्रकृतिकः कुजः परमं निदानमित्यपि ग्रन्थेषु प्रतिपाद्यते। यथा सारावल्यां ---

**इन्दुर्जलं कुजोऽग्निर्जलमसृगथवाग्निरेव पित्तं स्यात्।**
**एवं रक्ते क्षुभिते पित्तेन रजः प्रवर्तते स्त्रीषु।।** इति।

विषयोऽयं वराहमिहिराचार्यैः बृहज्जातकेऽपि निरूपितोऽस्ति --

**कुजेन्दुहेतुप्रतिमासमार्तवं गते तु पीडर्क्षमनुष्णदीधितौ।**
**अतोऽन्यथास्ते शुभपुंग्रहेक्षिते नरेण संयोगमुपैति कामिनी।।**

एतेन स्त्रीपुरुषयोः वैवाहिकजीवनस्य साफल्ये कुजस्य प्राधान्यं विज्ञातं भवति। चरकसंहितायां मानवशरीरे पित्तस्य गुणान् उपपादयता ग्रन्थकर्त्रा प्रोच्यते -- "**कट्वाम्लत्वात् अल्पशुक्रव्यवसायापत्याः**" इति। पित्तप्रधानः नरः यद्यपि कामाधिकः तथापि सः अल्पवीर्यः। तस्मात् तस्मिन् सन्तानोत्पादकशक्तिः क्षीणेति एतेन ज्ञायते। कुजः पित्तप्रधानः ग्रहः। तस्मात् जन्मकाले दुःस्थितः सः तत्सम्बद्धान् दोषान् मानवशरीरे सञ्जनयतीति तु सिद्धम्।

कुजदोषनिरूपणावसरे निर्दिष्टेषु लग्न-चतुर्थ-सप्तम-अष्टम-द्वादशस्थानेषु स्थितस्य कुजस्य कीदृशं फलं जातकग्रन्थेषु समादिष्टमित्यपि किञ्चिदत्र विचार्यते। लग्नस्थितस्य कुजस्य फलमित्थं निरूप्यते विविधग्रन्थेषु --

**गुदरोगी श्लथं नाभौ कण्डूकुष्ठादिनायितः।**
**मध्यदेशे भवेत् व्यङ्गः स वाच्यो लग्नगे कुजे।।**
**रक्तपीडा शिशुत्वे च वातरक्तं च जायते।**
**मस्तके कण्ठमध्ये तु गुदे वापि व्रणं भवेत्।।**
**भौमे लग्ने कुरूपश्च रोगी बन्धुविवर्जितः।**
**असत्यवादी निर्द्रव्यो जायते पारदारिकः।**
**उदरदेशरोगी शैशवे लग्नभौमे पिशुनमतिकृशाङ्गः पापवित् कृष्णरूपः।।**

इत्थं बहुत्र ग्रन्थेषु लग्नस्थितस्य कुजस्य दुष्टमेव फलं समुपपादितम्।

चतुर्थस्थितकुजस्य फलम् --

**विसुखः पीडितमानसश्चतुर्थे इति गुणाकरः।**
**बन्धुपरिच्छदरहितो भवति चतुर्थेऽर्थवाहनविहीनः।**
**अतिदुःखैः सन्तप्तः परगृहवासी कुजे पुरुषः।।**

इति च कल्याणवर्मा चतुर्थस्थितस्य कुजस्य फलं निरूपयति।

## स्वावलोकनप्रश्नः

**१) लग्नस्थितस्य कुजफलं लिखत ?**

________________________________________________________

________________________________________________________

________________________________________________________

**चतुर्थे भूसूते कृष्णः पित्ताधिक्योऽरिनिर्जितः।**

**वृथाटनो हीनपुत्रो महाकामी च जायते।।** इति काशीनाथः।

**चतुर्थे बन्धुमरणं शत्रुवृद्धिर्धनव्ययः।।** इति पराशरः।

बह्वाचार्याणां मतानुरोधेन चतुर्थस्थितः कुजः दुष्टमेव फलं वितनोतीति विज्ञायते। सप्तमभावगतस्य कुजस्य फलं परिशीलयामः।

**मृतदारो रोगार्तोऽमार्गरतो भवति दुःखितः पापः।**

**श्रीरहितः सन्तप्तः शुष्कतनुर्भवति सप्तमे भौमे।।**

इति सप्तमभावगतस्य कुजस्य फलं निरूपयति कल्याणवर्मा।

**स्त्रीमूलप्रविलापको वधरुचिः कामस्थिते भूमिजे** इति वैद्यनाथः।

**अङ्गारके मदनमन्दिरमिन्दुभावं मन्दान्वितेऽरिभवने जननेऽङ्गनायाः।**

**वैधव्यमेव नियतं कपटप्रबन्धात् वाराङ्गना भवति सैव वराङ्गनापि।।** इति पराशरः।

**स्त्रियां दारमरणं नीचसेवनं नीचस्त्रीसङ्गमः** इति पराशरः।

**मुनिगृहगतभौमे नीचसंस्थेऽरिगेहे युवतिमरणदुःखं जायते मानवानाम्** इति गर्गः।

**क्षितिजे नरस्य रमणी पित्तव्रणान्विता दग्धा वा विषवह्निना** इति पुञ्जराजः।

इत्थं सप्तमभावगतस्य कुजस्य दुष्टमेवं फलं समादिशन्ति सर्वेऽपि ज्योतिर्विदः।

अष्टमभावगतस्य कुजफलम् --

**निधनगेऽल्पसुतो विकलेक्षणः इति गुणकरः।**

**मृत्यौ धननाशं पराभवम् इति पराशरः।**

**व्याधिप्रायोऽल्पायुः कुशरीरो नीचकर्मकर्ता च।**

**निधनस्थे क्षितितनये भवति पुमान् नित्यसन्तप्तः।।** इति कल्याणवर्मा।

**मृत्युगतो मृत्युकरो महीजः शास्त्राग्निलूतादिभिरग्नितो वा।**

**कण्ठप्रणाशो गृहिणीप्रपीडा नयत्यधो नाशकमानयेच्च।।** इति गर्गः।

**कुतनुरधनोऽल्पाशुः छिद्रे कुजे जननिन्दितः।।** इति मन्त्रेश्वरः।

एवमष्टमस्थानस्थितस्यापि कुजस्य बहुभिराचार्यैरशुभमेव फलमुदीरितम्। द्वादशस्थितस्य कुजस्यापि बहुधा पापफलमेवोपपादितं बहुषु जातकग्रन्थेषु। इत्थं कुजदोषनिरूपणावसरे प्रोक्तेषु स्थानेषु कुजस्य स्थितिः वधूवरजातकेषु अशुभायैव भवतीति तु निर्विवादः। तत्रापि सप्तमाष्टमयोः स्थितस्य दोषाधिक्यं कथ्यते। कुजस्य चतुर्थ-सप्तम-अष्टमस्थानेषु पूर्णदृष्टिस्तस्मात् द्वादशे स्थितोऽपि सप्तमं पश्यति, लग्ने स्थितः सप्तमम्, अष्टमञ्च पश्यति, चतुर्थस्थोऽपि अष्टमं पश्यति।

## स्वावलोकनप्रश्नः

**२) अष्टमभावगतकुजफलं लिखत ?**

______________________________

______________________________

______________________________

स्त्रीजातके सप्तमस्थानात् सौभाग्यं भर्तृचिन्तनं च क्रियते। अष्टमात् माङ्गल्यविचारः प्रवर्तते। अत एव हेतोः सप्तमाष्टमभावगतस्य कुजदोषस्य दोषाधिक्यता। पापग्रहः कुजः तत्तद्भावगतं शुभफलं विनाशयति। कुजदोषचिन्तनावसरे स्त्रीजातकस्थः कुजः विशिष्ट द्रष्टव्यः। भारतीयसमाजे विधवायोषितः स्थानमानं बहुनिन्दितमस्ति। विधुराणां पुरुषाणां पुनर्विवाहस्य अवकाशः क्वचिद्वर्तते। यद्यपि कुजदोषः स्त्रीपुरुषयोः समानं फलं विधत्ते तथापि अस्मत्समाजव्यवस्थानुरोधेनापि फलविचारः करणीयश्चतुरमतिना दैवज्ञेन।

कुजदोषयुक्तानि जातकानि बहूनि भवन्त्येव। एवं तर्हि कुजदोषयुक्तस्त्रीपुरुषाणां का गतिः? तेषां परिणयावकाशः नास्त्येव वा ? इत्यादि प्रश्नाः अवश्यमेव उद्भवन्ति। कुजदोषस्य अपवादाश्च शास्त्रे समभिधीयन्ते।

**केन्द्रे कोणे शुभाढ्यश्चेत् त्रिषडायेऽप्यसद्ग्रहाः।**
**तदा भौमस्य दोषो न मदने मदपस्तथा।।**

**जामित्रे वा यदा सौरिः लग्ने वा हिबुके तथा।**
**नवमे द्वादशे चैव भौमदोषो न विद्यते।।**

**सप्तमस्थो यदा भौमः गुरुणा च निरीक्षितः।**
**तदा तु सर्वसौख्यं स्यात् मङ्गलो दोषनाशकृत्।।**

इत्यादिभिः प्रमाणैः कुजदोषेण बाधिते जातके शनिस्थितिवशात्, गुरुदृष्टिवशात्, सप्तमाधिपतिबलवशाच्च दोषः नश्यतीति प्रतिपाद्यते। तथा च --

**भौमतुल्यो यदा भौमः पापो वा तादृशो भवेत्।**
**उद्वाहः शुभदः प्रोक्तः चिरायुः पुत्रपौत्रदः।।**

उभयोर्वधूवरयोः जातकयोः यदि समानः दोषः दृश्यते तर्हि तयोः विवाहः शुभद इति दोषसाम्येन परिहारः कीर्तितः। किन्त्वत्र दोषसाम्यविचारे सावधानैर्भाव्यम्। स्त्रीजातके सप्तमे, अष्टमे वा स्थितस्य कुजस्य दोषं पुरुषजातके लग्नस्थितः चतुर्थस्थितो वा कुजः शनिर्वा अपनेतुं न शक्नोतीति पण्डिताः आमनन्ति। नीचराशिगृहस्थितस्य कुजस्य दोषः

अधिकः किन्तु स्वोच्चमूलत्रिकोणस्थितस्य प्रबलस्य दोषः अल्पः इत्यपि मन्वते ज्योतिर्विदः। किन्तु विषयेऽस्मिन् विवदन्ते विद्वांसः केचित्। तेषामभिप्रायेण दुर्बलस्य कुजस्य दोषाल्पता। लग्ने-मेषराशिस्थः, चतुर्थे वृश्चिकस्थः, सप्तमे मकरस्थितः, अष्टमे सिंहस्थः, द्वादशे धनूराशिस्थकुजः निर्दुष्ट इति स्थनभेदेनापि दोषापवादः निर्दिश्यते।

सत्यपि कुजदोषे क्वचित् परिहारोपायाश्च ग्रन्थेषु निरूपिताः समुपलभ्यन्ते। बालवैधव्यदोषस्य परिहारः इत्थं विधीयते --

**बालवैधव्यदोषे तु कुम्भेषु प्रतिमादिभिः।**
**कृत्वा लग्नं ततः पश्चात् कन्योद्वाह्येति चापरे।।**
**स्वर्णाम्बुपिप्पलानां च प्रतिमा विष्णुरूपिणी।**
**तया सह विवाहे तु पुनर्भूत्वं न जायते।।**

कुजदोषयुक्तायाः कन्यकायाः कुम्भविवाहेन स्वर्णनिर्मितविष्णुप्रतिमया सह विवाहः विधेयः। ततः परं सा वधूः चिरञ्जीविने वराय देयेति परिहारः निर्दिश्यते।

**देवब्राह्मणवन्दनात् गुरुवचः सम्पादनात्प्रत्यहं**
**साधूनामभिभाषणात् श्रुतिरवः श्रेयः कथाकर्णनात्।**
**होमादध्वरदर्शनाच्छुचिमनोभावज्जपाद्दानतः**
**नो कुर्वन्ति कदाचिदेव पुरुषस्यैवं ग्रहाः पीडनम्।।**

दुस्थिते ग्रहे तत्तद्ग्रहोक्तदेवताराधनेन, रत्नधारणेन, औषधसेवनेन, होमादीनामनुष्ठानेन, दानजपादिना औषधस्नानेन च ग्रहदोषाः परिहृताः भवन्तीति प्रश्नमार्गे ग्रन्थे ग्रन्थकर्त्रा निगद्यते। पूर्वोक्तेषु परिहारेषु वैज्ञानिकं तत्वं निगूढमस्तीति विद्वांसः आमनन्ति। ग्रहदोषनिवारणार्थं ग्रहोद्यानस्य निर्माणविधिरपि शास्त्रग्रन्थेषु समुपदिश्यते। विवाहात् पूर्वं वधूवरजातकयोः कुजदोषप्रमाणम् इतरकूटानुकूल्यम्, अपवादाः, परिहाराः सर्वमपि परिशील्यं परस्परानुकूल्यमन्विष्यते तर्हि विवाहजीवनं सुखप्रदमेव भवतीति ज्योतिश्शास्त्रे प्रमाणानि समुपलभ्यन्ते। इतोऽपि विषयेऽस्मिन् विपश्चिदामनुभव एव प्रमाणमित्यलमतिविस्तरेण।

# मलमासविचारः

ज्योतींषि ग्रहनक्षत्राणि तानि अधिकृत्य प्रवृत्तं शास्त्रं ज्योतिश्शास्त्रमित्यभिधीयते। इदं च शास्त्रं कालविधानशास्त्रमित्यपि व्यपदिश्यते। यतो हि शास्त्रेऽस्मिन् खगोलीयप्रमाणानि समवलम्ब्य कालस्य विभिन्नानि मानानि तदवयवाश्च निरूप्यन्ते।

**वेदास्तावद्यज्ञकर्मप्रवृत्ताः यज्ञाः प्रोक्तास्ते तु कालाश्रयेण।**
**शास्त्रादस्मात् कालबोधो यतः स्याद्वेदाङ्गत्वं ज्यौतिषस्योक्तमस्मात्।।**

वेदविहितानां यज्ञादिक्रियाकलापानां समनुष्ठानार्थं समुचितं समयं बोधयतीति ज्यौतिषस्य वेदाङ्गत्वमभिहितमिति भास्कराचार्याः आमनन्ति। भारतीयैरस्माभिः प्राचीनकालादपि यज्ञादिषु वा संस्कारेषु वा धार्मिककृत्येषु वा स्फुटकाल एव स्वीक्रियते। कर्मानुरोधेन चान्द्रसौरादिकालमानानि प्रयुज्यन्ते च। ज्योतिःशास्त्रे घटिका, मुहूर्तः, दिनं, पक्षः, मासः, ऋतुः प्रभृति विभिन्नाः कालप्रभेदाः समुदीरिताः। प्रबन्धेऽस्मिन् मासविषये किञ्चिद्विमृश्यते।

मासशब्दोऽयं मस परिमाणे इत्यस्माद्धातोः निष्पन्नः। मासशब्देन चान्द्रसौरमासयोरेव ग्रहणम्। यद्यपि सावननाक्षत्रमासयोः व्यवहार क्वचिद्विद्यते तथापि तयोर्न तथा उपयोगिता यावच्चान्द्रसौरमासयोः।

**मस्यन्ते परिमीयन्ते स्वकलावृद्धिहानितः।**
**मास एते स्मृता मासास्त्रिंशत्तिथिसमन्विताः।।**

मस्येते परिमीयेते यावता कालेन चन्द्रस्य वृद्धिक्षयौ इति चान्द्रो मासः। सूर्यस्य राशिगतिः यत्र परिमीयते स सौरो मासः।

**चान्द्रः शुक्लादिदर्शान्तः सावनस्त्रिंशता दिनैः।**
**एकराशौ रविर्यावत्कालं मासः स भास्करः।।**

एकस्मात् दर्शान्तात् द्वितीयदर्शान्तावधिकः कालः चान्द्रमासः इत्युदीर्यते। दर्शः सूर्येन्दुसङ्गमः अमावास्या वा। शीघ्रगतिकश्चन्द्रः दर्शान्तात् परं रविं त्यक्त्वा यावता

कालेन पुनस्तं प्राप्नोति सः त्रिंशत्तिथ्यात्मकः कालः चान्द्रमासः। इमे चैत्रादिचान्द्रमासाः चित्रादिनक्षत्रद्वयेन उपलक्षिताः भवन्ति।

**चित्रादितारकाद्वन्द्वे पौर्णमासीसमन्विते।**
**मासाश्चैत्रादयः कल्प्यास्त्रिकैः षष्ठान्त्यसप्तमाः।।**

यस्मिन् मासे चित्रास्वात्योरन्यतरनक्षत्रस्थे चन्द्रमपि पूर्णिमा सम्भवति स मासश्चैत्रः। विशाखानुराधयोरन्तरस्थे वैशाखः। एवमन्येऽपि भाद्रपद-आश्विन-फाल्गुनमासेषु त्रीणि त्रीणि नक्षत्राणि नियामकानि।

**चैत्रो मासो मधुः प्रोक्तो वैशाखो माधवो भवेत्।**
**ज्येष्ठमासस्तु शुक्लः स्यादाषाढः शुचिरुच्यते।।**
**नभोमासः श्रावणः स्यान्नभस्यो भाद्र उच्यते।**
**इषश्चाश्वयुजो मासः कार्तिकश्चोर्जसंज्ञकः।।**
**सहो मासो मार्गशीर्षः सहस्यः पुष्यनायकः।**
**माघमासस्तपाः प्रोक्तस्तपस्यः फाल्गुनः स्मृतः।।**

एवं चैत्रादिमासाः मध्वादिनामान्तरैश्च व्यवह्रियन्ते। किन्तु सूर्यसङ्क्रान्तिविशिष्टस्यैवं चान्द्रमासस्य शुद्धत्वम्। मेषसङ्क्रान्तस्य चान्द्रमासस्य चैत्र इति संज्ञा। वृषभसङ्क्रान्तस्य चान्द्रमासस्य वैशाख इति। एवमन्येऽपि।

मेषादिराशिषु क्रमेण रवेः सङ्क्रमात् मेषादिसौरमासाः प्रकीर्त्यन्ते। एकस्मात् रविसङ्क्रमात् द्वितीयरविसङ्क्रमपर्यन्तमेकः सौरमासः। विभिन्नयोः सौरचान्द्रमासयोः प्रमाणं सावनमानेन परिमीयते, सावनस्य प्रत्यक्षत्वात्। "**उदयादुदयं भानोः भूमिसावनवासरः**" इति, एकस्मात् रव्युदयात् द्वितीयरव्युदयं यावत् सावनं दिनमित्युदीर्यते। सौरमासस्य प्रमाणं सावनमानेन त्रिंशद्दिनानि षड्विंतिघटिकाः सावयवाः सप्तदशविघटिकाश्च, चान्द्रस्य तु प्रमाणम् एकोनत्रिंशद्दिनानि, एकत्रिंशत् घटिकाः सावयवाः पञ्चाशत् विघटिकाश्च। स्थूलरूपेण सौरचान्द्रमासयोः व्यत्यासः चतुःपञ्चाशत् घटिकात्मकः समुदेति। अयं व्यत्यासः यदा एकचान्द्रमासात्मकः सम्भवति तदैकोऽधिमासः सञ्जायते।

## स्वावलोकनप्रश्नः

१) सावनमानेन सूर्यचन्द्रयोः प्रमाणं निरूपयत ?

**द्वात्रिंशद्भिर्गतैर्मासैर्दिनैः षोडशभिस्तथा।**

**घटिकानां चतुष्केन पतति ह्यधिमासकः।।**

मध्यममानेन एतादृशोऽधिमासः द्वात्रिंशतिमासेषु षोडशदिनेषु चतसृषु घटिकासु चातीतेषु सम्भवति। परं स्फुरमानेन तु कदाचित् एकोनत्रिंशति मासेषु क्वचित् पञ्चत्रिंशति मासेषु कुत्रचित् त्रिंशति मासेषु वा सम्पद्यते। रविचन्द्रयोर्गतिवैलक्षण्यात् स्फुटाधिमाससम्भवे निर्दिष्टता नास्ति। अयं स्फुताधिमासः कदा प्राप्नोतीति प्रश्नः समुदेति। अत्र समाधानम् -

**असङ्क्रान्तिनासोऽधिमासः स्फुटः स्यात्**

**द्विसङ्क्रान्तिमासः क्षयमासः प्रदिष्टः।**

**क्षयः कार्तिकादित्रये नान्यदा स्यात्**

**तदा वर्षमध्येऽधिमासद्वयञ्च।।**

इति सिद्धान्तशिरोमणौ स्फुटः अधिमासः कथं लक्ष्यते इति समुल्लिखन्ति भास्कराचार्याः। यस्मिन् चान्द्रमासे सूर्यसङ्क्रमः न भवति स एव मासः स्फुटाधिमासः। यश्च चान्द्रमासः सङ्क्रमद्वयोपेतः स च क्षयमास इति कीर्त्यते। उभावपि अधिमासक्षयमासौ मलमासाविति प्रसिद्धौ। चान्द्रमासापेक्षया सौरमासस्य दैर्घ्यात् सङ्क्रान्तिरहितश्चान्द्रमासः भवितुमर्हति। किन्तु अल्पपरिमाणके चान्द्रमासे सूर्यसङ्क्रमद्वयं कथं सम्भवतीति प्रश्नोऽवश्यं समुदीयात्। सौरचान्द्रमासयोः प्रमाणं यदादौ उक्तं तन्मध्यममानेन। स्फुटयोस्तयोः क्वचिद्वैलक्षण्यं

सञ्जायते। वृश्चिकादित्रये सञ्चरति रवौ तद्गतिः ६१ कालपर्यन्तं वृद्धिमेति। गतिवृद्ध्या रविमासस्य ह्रासः। तदा चान्द्रापेक्षया सौरमासस्य प्रमाणमल्पं सम्भवति। तेन च रविमासः चान्द्रमासान्तः पाती भवितुमर्हति। तस्माच्च शुक्लप्रतिपदमारभ्य अमान्तात् पूर्वं रविसङ्क्रान्तिद्वयस्य सम्भवात् क्षयमासस्य दर्शनम्।

## स्वावलोकनप्रश्नः

**२) मलमासौ कौ ?**

________________________________________

________________________________________

________________________________________

अत्र क्षयमासस्य सम्भवः कार्तिकादित्रये एवेति यद् भास्कराचार्यैर्भणितं तत्तु तत्कालिकसूर्यमन्दोच्चस्य स्थितमुपलक्ष्य। तेषां काले सूर्यमन्दोच्चं मिथुने दृष्टम्। तस्मात् ततः षड्भान्तरे नीचस्य स्थितिः। स्पष्टगतेः परमत्वं नीचासन्ने ग्रहे सम्भवति। तस्मात् कार्तिकादित्रये एव क्षयमासस्य सम्भवः इति भास्करवचनं न दोषाय। यतो हि मन्दोच्चस्य गतौ बहुकालं व्यत्यासः न प्रतीयते। परन्तु कमलाकरभट्टः भास्करवचनमिदं कटुवचनैः खण्डयति।

**इदानीन्तनार्थं न शास्त्रं प्रवृत्तं**
**न सत् कार्तिकादित्रयोत्थं तदुक्तम्।**
**सुयुक्ता न मुन्युक्तिरप्यत्र शास्त्रे**
**भवेत् कार्यवर्यस्य या दृग्विरुद्धा।।**

शास्त्रवचनं सार्वकालिकं सत्यं भवेत्। तत्कालिकग्रस्थित्यनुरोधेन क्षयमाससम्भवविचारे यद्भास्करेण निरुक्तं तदसमीचीनम्। यतो हि गच्छति काले यः कोऽपि चान्द्रमासः

क्षयमासः भवितुमर्हतीति कमलाकरः प्रतिपादयति। एतादृशः क्षयमासः कदाचित् १४१ वर्षैः क्वचित् १९ वत्सरैश्च प्रायशः सम्भवतीति भास्कराचार्याः मन्वते।

यस्मिन् वर्षे सङ्क्रान्तिद्वयोपेतः क्षयमासः सम्भवति तस्मिन् वर्षे क्षयमासात् प्रगेकोऽधिमासः ततस्तत्परञ्चान्यो अधिमास अवश्यं सम्भवति। तदा प्राक्समापन्नोऽधिमासः संसर्प इति क्षयमासः अहंस्पतिरिति ततश्चानन्तरभावः अधिमास इति च प्रकीर्त्यन्ते। सर्वेऽपि इमे मासाः मलमासा इति परिगण्यते। अत्र कालाधिक्ये सति नपुंसकत्वेन मलत्वाङ्गीकारः नपुंसकत्वञ्च ज्योतिःशास्त्रेऽभिहितम् --

**असङ्क्रान्तो हि यो मासः कदाचित्तिथिवृद्धितः।**
**कालान्तरात् समायाति स नपुंसक इष्यते।।** इति।

पुरुषस्य सूर्यस्य तत्रासद्भावात् नपुंसकत्वम्।

**अरुणः सूर्यो भानुस्तपनश्चान्दो रविर्गभस्तिश्च।**
**अर्यमा हिरण्यरेता दिवाकरमित्रविष्णू च ।।**

## स्वावलोकनप्रश्नः

**३) भास्कराचार्यमतेन क्षयमासः कदा सम्भवति ?**

---

---

---

एते अरुणादिद्वादशसूर्याः माघादिषु चान्द्रमासेषु क्रमेण समुदयन्ति। अधिमासे सूर्यसङ्क्रामराहित्यात् तस्य नपुंसकत्वम्। तेन च तस्य मलत्वम्। रव्यतिपाताच्च सङ्क्रमद्वयोपेतस्य क्षयमासस्य मलत्वम्। तस्मादुभावपि मासावेतौ मलमालाविति प्रकीर्त्येते।

**यस्मिन् मासे न सङ्क्रान्तिः सङ्क्रान्तिद्वयमेव वा।**

**संसर्पांहस्पती मासावधिमासश्च निन्दितः।।**

इति संसर्प-अंहस्पति-अधिमासानां सर्वेषु कर्मसु गर्हितत्वं शास्त्रे विहितम्। किन्तु तदपवादत्वेन संसर्पस्य कर्मयोग्यत्वं क्वचित् श्रूयते। यथा --

**मासद्वयेऽब्दमध्ये तु सङ्क्रान्तिर्न यदा भवेत्।**

**प्राकृतस्तत्र पूर्वः स्यादधिमासस्तथोत्तरः।।**

यदा वर्षमध्ये अधिमासद्वयं सम्भवति तदा पूर्वः असङ्क्रान्तः यो मासः सः प्राकृतः, शुद्धः कर्मार्हः इति विधानं दृश्यते। कर्मार्हः सन् सम्यक् सर्पतीति संसर्प इति तस्याभिधानम्। मलमासेष्वपि वर्ज्यावर्ज्यकर्मणां विवेचनमित्थं निरूप्यते। यथा --

**नित्यनैमित्तिके कुर्याच्छ्राद्धं कुर्यान्मलिम्लुचे।**

**तिथिनक्षत्रवारोत्थं काम्यं नैव कदाचन।।**

मलमासेषु नित्यानि नैमित्तिककर्माणि चैव शास्त्रे विहितानि। काम्यकर्माणि न जातु विधेयानि।

**जातकर्म च पुंसूतिः सीमन्तोन्नयनं व्रतम्।**

**मलिम्लुचेऽपि कर्तव्यं निमित्तं यदि जायते।।**

जातकर्म, पुंसवनं, सीमन्तोन्नयनमित्यादि ये गर्भसंस्काराः ते तु अवश्यं समनुष्ठेयाः। यतो हि इमे सकाले एव विधेयाः, कालप्रतीक्षानर्हत्वात्। एवं च वृष्ट्यभावात् सस्यानि शुष्यन्ति, समस्तजीवानां जलाभावश्चापतति, मलमासश्च सम्प्राप्तः चेत् "**कारीर्या वृष्टिकामो यजेत**" इति विहितेष्टिः कालविलम्बं न सहते। तदा मलमासेऽपि सा समनुष्ठेयेति शास्त्रवचनम्।

**प्रवृत्तं मलमासात् प्राक् काम्यकर्मासमापितम्।**

**आगते मलमासेऽपि तत्समाप्तिर्न संशयः।।**

मलमासात् प्राक्प्रवृत्तानां काम्यकर्मणां प्रायश्चित्तकर्मणां च समाप्तिः मलमासेऽपि युज्यत इति शास्त्रसमयः। तत्र कालनिरीक्षणं नैवोचितमिति शास्त्रविदामाशयः।

मलमासेषु वर्ज्यावर्ज्यकर्मणां विषयः धर्मशास्त्रग्रन्थेषु विस्तरेण विमृष्टः। तेषु अनुष्ठेयानां तत्तत्कर्मणां विचारे क्वचिन्मतभेदे सत्यपि बहुत्र ऐक्यमत्यमेव प्रतीयते। तत्तत्परम्परानुरोधेन कर्मणां समाचरणं श्रेयस्करमिति अलमितिविस्तरेण।

## स्वावलोकनप्रश्नः

**४) मलमासे क्रियमाणाः संस्काराः ?**

______________________________

______________________________

______________________________

# राजयोगाः

ज्योतिषशास्त्रस्य होरास्कन्धे नैके राजयोगाः वर्णिताः। को नाम योगः इति प्रश्ने सति **योजयन्तीति योगाः** इति व्युत्पत्त्यनुसारं शरीरिणं सर्वविधप्रारब्धकर्मसु शुभाशुभफलयोजनमेव योगः इत्युक्तं प्रश्नमार्गकारेण यथा --

**ग्रहाणां स्थितिभेदेन पुरुषं योजयन्ति हि।**

**फलैः कर्मसमुद्भूतैरिति योगाः प्रकीर्तिताः।।** इति।

अत्रोच्यते यत् रव्यादिग्रहाणां तत्कालस्थितिभेदेन योगप्रकाराः ज्ञायन्ते । इदमेव योगनिर्वचनमिति। ज्योतिश्शास्त्रे सप्तविधसम्बन्धेन योगाः भवन्ति। यथा - १) स्थानसम्बन्धेन २) भावसम्बन्धेन ३) ग्रहयोगसम्बन्धेन ४) स्थान-भाव-ग्रहाणां सम्बन्धेन ५) स्थान-भावयोः सम्बन्धेन ६) भाव-ग्रहाणां च सम्बन्धेन ७) स्थान-ग्रहाणां च सम्बन्धेन ।

एवं सप्तविधसम्बन्धेन जातके शुभाशुभयोगाः भवन्ति। तत्र शुभयोगेषु अन्यतमाः भवन्ति राजयोगाः। जातके अत्युत्कृष्टग्रहस्थित्या योगेन वा राजयोगाः सम्भवन्ति। राजयोगजाताः धनिनः, राजानः, श्रेष्ठाः, प्रसिद्धाश्च भवन्ति। अध्यायेऽस्मिन् राजयोगानां महाराजयोगानां च विषये चर्चा क्रियते। अत्र ज्योतिश्शास्त्रे विद्यमानानां सर्वेषामपि प्रसिद्धानां राजयोगानां महाराजयोगानां च लक्षणानि फलसहितानि क्रमशः उपस्थाप्यन्ते।

## पञ्चमहापुरुषयोगाः

राजयोगेषु पञ्चमहापुरुषयोगाः अत्यन्तं मुख्याः। एतेषु योगेषु उत्पन्नः अवश्यं राजा राजसमो वा जायते। एते महापुरुषयोगाः आहत्य पञ्च भवन्ति। कीदृशग्रहस्थितौ एतेषां योगानां सम्भवः? कदा च तेषां फलप्राप्तिकाल इत्येतेषां प्रश्नानां समाधानमत्र प्रदीयते।

## श्लेंख्र्व्वंक्लुंटर्शौं

रुचक - भद्र- हंस- मालव्य- शश इति एते पञ्चमहापुरुषयोगाः।

कुजादिपञ्चताराग्रहाः क्रमशः यथा कुजः, बुधः, गुरुः, शुक्रः, शनिः एतेषां योगानां कारकाः भवन्ति। ग्रहस्थितिस्तावत् कीदृशी भवेदित्यत्रोच्यते। कुजादिपञ्चताराग्रहेषु यः कोऽपि ग्रहः स्वोच्चस्थाने अथवा स्वक्षेत्रे भूत्वा लग्नात् केन्द्रे भवति तर्हि तत्तद्ग्रहोक्तः महापुरुषयोगः सम्भवति। पञ्चमहापुरुषयोगानां कारकाः सारण्या दर्श्यन्ते।


| **योगः** | **कारकाः** |
|---|---|
| रुचकः | कुजः |
| भद्रः | बुधः |
| हंसः | गुरुः |
| मालव्यः | शुक्रः |
| शशः | शनिः |

उक्तञ्च यथा --

**रुचकभद्रकहंसकमालवाः सशशका इति पञ्च च कीर्तिताः।**

**स्वभवनोच्चगतेषु चतुष्टये क्षितिसुतादिषु तान् क्रमशो वदेत्।।** इति।

महापुरुषयोगस्य एकमुदाहरणम् --




अत्र कुजस्योच्चस्थानं मकरराशिः। कुजः उच्चस्थानस्थितो भवति। कुजः लग्नात् केन्द्रेषु अन्यतमे दशमे स्थितत्वात् रुचकमहापुरुषयोगः सम्भवति। कुजस्य मेषवृश्चिकयोः अन्यतरस्थाने स्थितत्वादपि योगोऽयं सम्भवति। एवमेव अन्येषामपि ग्रहाणां ज्ञेयम्। अधुना

महापुरुषयोगफलानि उच्यन्ते --

## रुचकयोगफलम्

रुचकयोगे जातः दीर्घास्यः , शूरः, शक्तिमान्, गर्वोत्तमः, सद्गुणविख्यातः, विजयी, सेनापतिश्च जायते।

## भद्रयोगफलम्

दीर्घजीवी, आचारवान् , निर्मलः, विद्वज्जनश्लाघितः, अतुलवैभवसम्पन्नः राजा भवति भद्रयोगे जातः।

## हंसयोगफलम्

हंसयोगे जातः सज्जनैः प्रशंसितः राजा भवति। तस्य हस्ते पादे च शङ्खकमल - मत्स्याङ्कुशादीनां चिन्हानि भवन्ति। हंसयोगजातः सुन्दरः मिष्टान्नभोजी, धार्मिकश्च भवति।

## मालव्ययोगफलम्

मालव्ययोगे जातः दृढनिश्चयः, धनवान्, स्त्रीपुत्रादिसौभाग्यसम्पन्नः, भोजनप्रियः, अनेकवाहनसम्पन्नः, यशस्वी राजा भवति। अयं विद्वान्, प्रसन्नमतिश्च भवति।

## शशयोगफलम्

शशयोगे जातः सर्वजनैः प्रशंसितः, सुभृत्ययुक्तः, बलवान्, ग्रामाधिपः नृपो वा भवति। अयं कुटिलमतिः सौभाग्यशाली भवति।

एते पञ्चमहापुरुषयोगाः लग्नादुक्ताः चन्द्रादपि कदाचित् स्वीकर्तुं शक्यन्ते। अत्र प्रमाणमुपलभ्यते यथा -- **''लग्नेन्द्वोरपि योगपञ्चकमिदं साम्राज्यसिद्धिप्रदम्''** इति। अत्रोच्यते यत् एते योगाः साम्राज्यसिद्धिप्रदा भवन्ति इति।

कस्यचित् जातके यदि एतेषु पञ्चमहापुरुषयोगेषु एकोऽपि योगः स्यात्तर्हि सः जातकः भाग्यवान् भवति। महापुरुषयोगद्वयं यदि कस्यचित् जातके दृश्यते तर्हि सः जातकः राजसमो भवति। त्रयः ग्रहाः यदि महापुरुषयोगकारकाः भवन्ति सः जातकः राजा

भवति। चत्वारो ग्रहाः यदि योगकारकास्तर्हि जातकः साम्राट् भवति। तथैव यदि पञ्चापि ग्रहाः महापुरुषयोगकारकाः भवन्ति अर्थात् पञ्चमहापुरुषयोगाः जातके भवन्ति चेत् तर्हि सः समस्तस्य भूमण्डलस्य अधिपतिर्भवति इत्यत्र संशयलेशोपि नास्ति इति शास्त्रवचनम्।

## चान्द्रयोगाः

चान्द्रयोगाः चन्द्रात् चिन्त्याः भवन्ति। अत्र चन्द्रलग्नस्यैव प्राधान्यमित्यतः एतेषां चान्द्रयोगाः इति प्रसिद्धिः। चान्द्रयोगेषु सुनफा - अनफा - दुरुधरा - केमद्रुम - इत्येते चत्वारः योगाः मुख्याः प्रसिद्धाश्च। अधुनात्र कथं चतुर्णामेतेषां चान्द्रयोगानां सङ्गतिरिति जानीमः।

**सुनफायोगः** - चन्द्रात् द्वितीये रविभिन्ने ग्रहे स्थिते अर्थात् कुजादिपञ्चताराग्रहे स्थिते सुनफायोगसम्भवः।

**अनफायोगः** - चन्द्रात् द्वादशे रविभिन्ने ग्रहस्थिते अनफायोगसम्भवः।

**दुरुधरायोगः** - चन्द्रात् द्वितीये द्वादशे च रविभिन्नग्रहस्थित्या अर्थात् कुजादिपञ्चताराग्रहाणां चन्द्रात् द्वितीयद्वादश इत्युभयत्रापि स्थितिर्भवति तर्हि दुरुधरायोगः सम्भवति।

**केमद्रुमयोगः** - चन्द्रात् द्वितीयद्वादशे ग्रहाभावे अर्थात् जन्मराशितः द्वितीये द्वादशे च यदि न कोऽपि ग्रहः स्थितः। भवति तर्हि केमद्रुमयोगसम्भवः।

इत्येवंरीत्यात्र चान्द्रयोगाः प्रतिपादिताः। इतः परं चान्द्रयोगानां फलानि क्रमशः उपस्थाप्यन्ते।

## स्वावलोकनप्रश्नः

**१) चान्द्रयोगान् लिखत ?**

______________________________

______________________________

______________________________

## चान्द्रयोगफलानि

अधुना पूर्वोक्तानां सुनफादियोगानां फलानि जानीमः। आधुनिकेऽस्मिन् युगे यः कोऽपि विषयः उच्यते अथवा अस्माभिरुपस्थाप्यते चेत् झटित्येव तस्य किं प्रयोजनमथवा फलमिति प्रश्नो जागर्ति। अतः अस्माभिः यत्किमपि उच्यते- तत् प्रमाणपुरस्सरं फलसहितं स्यादेव इति कृत्वैव अत्र योगानुक्त्वा तदनु फलान्यपि कथ्यन्ते। तत्रादौ-

### सुनफायोगफलम्

सुनफायोगोत्पन्नः स्वार्जितधनेन वैभवसम्पन्नः राजा तत्समो वा जायते इति शास्त्रवचनम्।

### अनफायोगफलम्

अनफायोगसम्पन्नः शक्तिमान् , स्वस्थः, शीलवान् विख्यातः, भौतिकसुखसम्पन्नः, प्रसन्नचित्तश्च भवतीति वाच्यम्।

### दुरुधरायोगफलम्

दुरुधरायोगोत्पन्नः भोगसुखसौभाग्यवाहनादिसुखं प्राप्नोति। जाकतोऽयं त्यागी सत्कर्मचारिभिर्युक्तश्च भवति।

### केमद्रुमयोगफलम्

केमद्रुमयोगजातः राजकुलोत्पन्नोऽपि मलिनः, नीचः, दासः, निर्धनश्च सञ्जायते।


फलकथनावसरे ग्रहाणां बलाबलं निरीक्ष्य एव निर्णयस्वीकरणं भवेदिति शास्त्र वचनम्। चान्द्रयोगानां उदाहरणानि सारण्या दर्शयन्ते --












## सूर्यवशात् जायमानाः योगाः

एतावत्पर्यन्तं चान्द्रयोगाः तेषां स्वरूपं फलञ्च अस्माभिः सम्यगधिगतम्। अधुना सूर्यवशात् अर्थात् सूर्यं केन्द्रीकृत्य जायमानाः योगाः पठ्यन्ते। तत्रादौ वेसि-वासि-कर्तरि-उभयचरी-इत्यादियोगानां विचारः क्रियते।

**शुभवेसियोगः**

सूर्याधिष्ठतराशितः द्वितीये भावे यदि शुभग्रहाणां अर्थात् बुध-गुरु-शुक्राणां स्थितिः स्यात्तर्हि शुभवेसि योगस्सञ्जायते। अस्मिन् योगे जातः भाग्यवान् , धैर्यवान्, धार्मिकश्च राजा भवति।

**शुभवासियोगः**

सूर्याधिष्ठराशितः द्वादशे यदि शुभग्रहाणां स्थितिर्भवेत् तर्हि शुभवासियोगः सम्भवति। शुभवासियोगजातः विख्यातः, सर्वप्रियः, भाग्यवान्, दानवीरः, राजप्रियश्च भवति।

**शुभोभयचारियोगः**

सूर्याधिष्ठितराशितः द्वितीये द्वादशे च यदि शुभग्रहाणां स्थितिर्भवेत् तर्हि शुभोभयचारियोगो वाच्यः। योगेऽस्मिन् उत्पन्नस्तु सुन्दरः , प्रियवाकपटुः, वाचालः, यशस्वी, धनधान्यसम्पन्नश्च भवति।

**अशुभवेसि- वासि-उभयचारियोगाः फलञ्च**

सूर्यस्थितराशितः द्वितीये भावे पापग्रहौ अर्थात् शनिकुजौ यदि भवेतां तर्हि

अशुभवेसियोगो वाच्यः। उभयोर्मध्ये एकः ग्रहः भवति चेदपि योगः भवेदेव।

सूर्यात् द्वादशे यदि पापग्रहस्थितिर्भति तर्हि अशुभवासि योगः सम्भति।

सूर्यात् द्वितीयद्वादशे यदि अशुभग्रहस्थितिश्चेत् तर्हि अशुभोभयचरीयोगः सम्भवति।

अशुभवेसियोगफलं तावत् इत्थं प्रदीयते।

अशुभवेसियोगजातः अन्यनिन्दकः, दुष्टः, निम्नस्तरीयव्यक्तीनां प्रियश्च भवति।

अशुभवासियोगजातः अन्यनिन्दकः, दुष्टैः मित्रैः युतः, दीनवृत्तियुतः, शास्त्रमर्मज्ञश्च भवति। अशुभोभयचरीयोगजातस्तु अपकीर्तिमान्, धनहीनः, विद्याविहीनः, भाग्यरहितश्च भवति।

**शुभाशुभकर्तरीयोगफलम्**

१. शुभकर्तरीयोगजातः निर्भयः, निरोगी, शत्रुरहितः, सुखी, धनैवैभवादिसुखसम्पन्नो भवति।

२. अशुभकर्तरीयोगोत्पन्नः निर्धनः, मलिनः, स्त्रीपुत्रादिरहितः अङ्गहीनश्च जायते।

## केचन मुख्याः राजयोगाः

**अमलायोगः**

जन्मलग्नात् चन्द्रलग्नात् वा दशमभावे शुभग्रहयोगो भवति तदा अमला योगः सम्भवति। **फलम्** - अमलायोगे जातः आचारवान्, धर्मिकप्रवृत्तिमान् , प्रसन्नचित्तः, सौभाग्यवान्, मृदुस्वभावः, धनी, स्मितमृदुभाषणश्च भवति।

**महाभाग्ययोगः**

कस्यचित् पुरुषस्य जन्म यदि दिवा भवति तदानीं लग्नं, सूर्यः, चन्द्रमा इत्येते त्रयः अपि यदि विषम राशिषु भवति तर्हि महाभाग्ययोगः उत्पद्यते। स्त्रीणां विषये तु तद्विपरीततया अर्थात् स्त्रीणां यदि रात्रौ जन्म भवति लग्नचन्द्रसूर्याश्च विषमराशिगताः चेत् तर्हि महाभाग्ययोगः उत्पद्यते।

योगेऽस्मिन् जातः वाक्पटुः, उदारः, विख्यातः, राजसमः, सकलनयनानन्दजनकश्च

भवति। यदि महाभाग्ययोगजाता कन्या चेत् सुचरित्रा, धनसुमाङ्गल्यसहिता, पुत्रपौत्रादिभिर्युक्ता सौभाग्यशालिनी च भवति।

**केसरी योगः**

जातके गुर्वधिष्ठतराशितः चतुर्थ- सप्तम-दशम स्थानेषु कुत्रचित् चन्द्रस्य स्थितिर्भवेत् तदानीं केसरियोगः सम्भवति। केसरियोगस्य गजकेसरियोग इत्यपि पर्यायः। **फलम्**- केसरीयोगजातः सिंह इव शत्रुनाशं करोति। सः गम्भीरः, राजसवृत्तिसम्पन्नः , दीर्घजीवी अतियशाश्च भवति।

**शकटयोगः**

बृहस्पत्यधिष्ठितराशितः षष्ठे अष्टमे वा चन्द्रस्य स्थित्या शकटयोगः सम्भवति। परं तस्मिन्नेव जातके यदि चन्द्रः लग्नात् केन्द्रगतश्चेत् शकटयोगस्य भङ्गः भवति। **फलम्** - शकटयोगजातः कदाचित् भाग्यपरिच्युतः भवति। एवमेव कदाचित् पुनः भाग्यं विन्दति। शकटयोगजातः लोके अप्रसिद्धः सन् सामान्यजीवनं यापयति। मानसिकवेदनामनुभवन् सर्वदा दुःखी तिष्ठति।

**अधम-सम-वरिष्ठयोगाः**

रव्यधिष्ठितराशितः केन्द्रस्थानेषु चन्द्रस्थित्या अधमयोगः। रव्यधिष्ठितराशितः पणपरस्थानेषु चन्द्रस्थित्या समयोगः। रव्याधिष्ठितराशितः आपोक्लिमस्थानेषु चन्द्रस्थित्या वरिष्ठयोगः। उदाहरणानि -

## स्वावलोकनप्रश्नः


**२) महाभाग्ययोगं लिखत ?**


___


___

___

___















## वसुमत् -अमला-पुष्कलयोगलक्षणानि फलञ्च

### वसुमद्योगः

लग्नात् चन्द्राद्वा उपचयस्थानेषु (३,६,१०,११) सर्वेऽपि शुभग्रहाः व्यवस्थिताः भवन्ति तदा वसुमत् नामको योगः उत्पद्यते। उदा -



* लग्नस्य स्थाने चन्द्रस्य स्थितिरपि योगमुत्पादयति। **फलम्-** वसुमद्योगजातः धनधान्यसम्पन्नः, स्वगृहनिवासी च भवति।

**अमलायोगलक्षणं फलञ्च**

लग्नात् चन्द्राद्वा यदि दशमे भावे सर्वेऽपि शुभग्रहाः तिष्ठन्ति तर्हि अमलायोगः सम्पद्यते। **उदा -**




* चन्द्रादपि एवमेव चिन्तनीयम्। **फलम्-** अमलायोगसमुत्पन्नः धनवैभवसम्पन्नः सत्पुत्रयुक्तः नीतिमान् यशस्वी भूपतिर्भवति।

**पुष्कलयोगः**

लग्नाधिपतिः राश्याधिपतिश्च स्वाधिमित्रस्थानेषु केन्द्रस्थानेषु वा व्यवस्थिता भवन्ति तथैव लग्ने शुभग्रहाणां दृष्टिः भवति चेत् पुष्कलयोगः सम्भवति।

ग्रन्थकारेण पुष्कलयोगस्य प्रकारद्वयमुच्यते। यथा --

१. लग्नेशः तथा चन्द्रराशीशः इत्येताभ्यां युतिः केन्द्रस्थाने स्यात्तथैव लग्नस्योपरि शुभग्रहाणां दृष्टिः अपि स्यात्तदानीं पुष्कलयोगो वाच्यः।






२. चन्द्रराशीशलग्नेशौ स्वीयाधिमित्रराशौ युतौ भवतः तथैव लग्नस्योपरि शुभग्रहदृष्टिश्च भवति तदानीं पुष्कलयोगो भवति।

**पुष्कलयोगफलम्**

पुष्कलयोगे जातः राजश्रेष्ठः, धनसम्पन्नः, विख्यातः, बहुमूल्यवस्त्रालङ्कृतो सर्वोत्तमश्च राजा भवति।

**शुभमालायोगः**

पञ्चम-षष्ठ-सप्तमभावेषु सर्वेऽपि शुभग्रहाः पङ्क्त्या भवन्ति चेत् शुभमालायोगः सम्भवति। शुभमालायोगजातः उदारः, दानी, परोपकारी, सत्सुतसुदारयुतो राजा भवति।

**उदा** -

| | | | |
|---|---|---|---|
| | | | **लग्नम्** |
| | **शुभमालायोगः** | | |
| | | | |
| **शुक्रः** | **गुरुः** | **बुधः** | |

**अशुभमालायोगः**

शुभग्रहाः यदि षष्ठाष्टमद्वादशभावेषु स्थिताः भवन्ति तदा अशुभमालायोगः सम्भवति। **फलम्** - कृतघ्नः, कुमार्गयुक्तः, कलहप्रियः, लोकनिन्दापात्रश्च भवति।

**उदा** -

| | | | |
|---|---|---|---|
| | | **शुक्रः** | **लग्नम्** |
| | **अशुभमालायोगः** | | |
| **बुधः** | | | |
| | **गुरुः** | | |

## स्वावलोकनप्रश्नः

३) अशुभमालायोगं लिखत ?

**लक्ष्मीयोगः तत्फलञ्च**

स्वक्षेत्रगतः स्वोच्चगतो वा शुक्रः तथा भाग्येशः यदि केन्द्रे त्रिकोणे वा स्थितश्चेत् लक्ष्मीयोगः। लक्ष्मीयोगजातः सुलक्षणः, धनी, लोकप्रियः श्रेष्ठश्च भवति। **उदा** --




**गौरीयोगः तत्फलञ्च**


स्वक्षेत्रगतः स्वोच्चगतो वा चन्द्रः केन्द्रे त्रिकोणे वा स्थितो यदि तर्हि गौरीयोगो वाच्यः। एतद्योगजातः सुन्दरः, राजप्रियः, सत्पुत्रवान् च भवति।

**सरस्वतीयोगः तत्फलञ्च**

गुरुशुक्रबुधाः केन्द्रे त्रिकोणे वा अथवा द्वितीयभावगताः वा भवेयुः। तेषु गुरुः

स्वोच्चस्थानगतः मित्रक्षेत्रगतो वा बलवान् भवति चेत् तदा सरस्वतीयोगः सम्भवति। सरस्वतीयोगजातः बुद्धिशाली, गणितालङ्कारादिशास्त्रेषु निष्णातः, धनवान्, स्त्रीपुत्रादिसंयुक्तः श्रेष्ठो राजा भवति।

**उदा** --




## श्रीकण्ठयोगः फलञ्च

रवि-चन्द्र-लग्नेशाः स्वोच्चराशौ, स्वराशौ मित्रगृहे वा सन्तः लग्नात् केन्द्रे त्रिकोणे वा भवन्ति चेत् तदा श्रीकण्ठयोगसम्भवः। श्रीकण्ठयोगजातः रुद्राक्षाभरणः, विभूतिधवलः, अतिधार्मिकः, शैवसम्प्रदायनियमानां पालकः, निरन्तरं शिवाराधनतत्परश्च भवति। **उदा** -




## श्रीनाथविरिञ्चियोगौ

शुक्रबुधभाग्येशाः स्वोच्चस्थाः, स्वराशिगताः, मित्रगृहगताः वा भूत्वा लग्नात् केन्द्रे त्रिकोणे वा भवन्ति चेत् श्रीनाथयोगः। श्रीनाथयोगोक्तग्रहस्थितौ यदि रवि-गुरु-पञ्चमे भवन्ति तदा विरिञ्चियोगो वाच्यः। **फलम्** - श्रीनाथयोगोजातः धनसम्पन्नः, विष्णोः आधारकः, भाग्यवान् च भवति। विरिञ्चियोगजातस्तु ब्रह्मज्ञानी, बुद्धिमान्, वैदिकज्ञानसम्पन्नः,

गुणवान् प्रसन्नचित्तश्च भवति।

**राजयोग-शङ्खयोगौ**

धर्मकर्माधिनेतारौ शुभस्थानगतौ चेत् राजयोगः सम्भवति। केन्द्रस्थानाधिपतिः त्रिकोणाधिपतिना सार्धं शुभस्थानगतश्चेत् शङ्खयोगः सम्भवति। राजयोगसमुत्पन्नः समस्तराजचिह्नयुक्तो राजा भवति। शङ्खयोगोत्पन्नः श्रेष्ठाभिः स्त्रीभिः सहितः अनेक सुखभोगयुक्तो जायते।

**संख्यायोगाः**

केषुचित् सप्तसु भावेषु सर्वे ग्रहाः स्थिता भवन्ति चेत् वीणानामकः योगः।

केषुचित् षट्सु भावेषु सर्वे ग्रहाः तिष्ठन्ति तदा दामयोगः।

केषुचित् पञ्चसु भावेषु सर्वे ग्रहाः तिष्ठन्ति तदा पाशयोगः।

केषुचित् चतुर्षु भावेषु सर्वे ग्रहाः तिष्ठन्ति तदा केदारयोगः।

केषुचित् त्रिषु भावेषु सर्वे ग्रहाः तिष्ठन्ति तदा शूलयोगः।

केषुचित् भावद्वयो एव सर्वे ग्रहाः स्थिता भवन्ति तदा युगयोगः।

एकस्मिन्नेव भावे सर्वे ग्रहाः स्थिता भवन्ति तदा गोलयोगः।

इत्येवं रीत्या वीणा, दाम, पाश, केदार, शूल, युग, गोल, इत्येते सप्तयोगाः संख्यायोगाः भवन्ति। पूर्वोक्तानां योगानामभावे एतेषां योगानां ग्रहणं कार्यमिति ग्रन्थकारस्य आशयः।

## स्वावलोकनप्रश्नः

**३) संख्यायोगाः कति ? ते के ?**

________________________________________________________

________________________________________________________

________________________________________________________

### सप्तसंख्यायोगानां फलानि

१) वीणायोगजातः नृत्यसङ्गीतादिषु रक्तः धनसम्पन्नश्च भवति।

२) दामयोगजातः दानशूरः राजा भवति।

३) पाशयोगजातः शीलवान्, धनवान् बन्धुयुतश्च भवति।

४) केदारयोगजातः कृषिभूमियुक्तः धनसम्पन्नश्च भवति।

५) शूलयोगे जातः धनहीनः, क्रोधी, हिंसकश्च जायते।

६) युगयोगयुक्तः द्रव्यहीनः दुःखितश्च भवति।

७) गोलयोगजातस्तु नीचजनानुरक्तः, अल्पज्ञः, अलसः, अल्पायुश्च भवति।

### अधियोगः तत्फलञ्च

सर्वेऽपि शुभग्रहाः लग्नात् चन्द्रात् वा सप्ताष्टमभावेषु व्यवस्थिताश्चेत् अधियोगः सम्भवति। अधियोगे उत्पन्नः, धनी, नेता, मन्त्री, विख्यातश्च भवति। इत्येवं रीत्यात्र राजयोगेषु मुख्याः प्रसिद्धाश्च योगाः चर्चिताः। अग्रे महाराजयोगाध्याये इतोऽपि केषाञ्चित् प्रसिद्धानां योगानां चर्चा विधास्यते।

## महाराजयोगभेदाः

### ग्रहाणां राजयोगकारकस्थितिः

यदि उच्चस्थाः स्वराशिगता वा त्रयः ततोऽधिका वा ग्रहाः केन्द्रगाः स्युः तर्हि जातकः प्रसिद्धो राजा भवति। यदि ईदृशाः पञ्चग्रहाः केन्द्रस्थाः स्युः तर्हि इतरकुलोत्पन्नोऽपि जातकः गजतुरगादिसमूहेन युक्तो राजा भवति। यदि जातकः दुर्योगे उत्पन्नो न स्यात् तथा उक्तयोगकारको ग्रहः अस्तंगतो न स्यात् तर्हि राजकुलोत्पन्नो बालो राजा भवत्येव।

एक एव ग्रहो यदि नीचस्थो भूत्वा, सुस्थानेषु वक्रीभूत्वा, प्रखरैः किरणैर्युक्तः स्यात्तर्हि जातकः राजतुल्यं वैभवमाप्नोति। यदि जन्माङ्गे इत्थं ग्रहद्वयं स्यात्तर्हि जातकः राजा भवति। एवं स्थितौ अधिका ग्रहाः सन्ति चेत् जातकः किरीटच्छत्रचारमादिराजलक्षणान्वितो राजा भवति। तथाहि --

**यद्येकोऽपि दिशजितांशुनिकरः सुस्थानगो वक्रगो**

**नीचस्थोऽपि करोति भूपसदृशं द्वौ वा त्रयो वा ग्रहाः।**

**एवं चेज्जनयन्ति भूपतिममी शस्तांशराशिस्थिता-**

**स्तद्वच्चेद्बहवो नृपं समुकुटच्छत्रोल्लसच्चामरम्।।** इति।

ग्रहद्वयं ग्रहत्रयं वा यदि दिग्बलयुक्तं स्यात् तर्हि राजकुलोत्पन्नः जातकः राजा भवति। शन्यतिरिक्ताः पञ्च चत्वारो वा ग्रहाः दिग्बलयुक्ताः स्युश्चेत् सामान्यकुलोत्पन्नोऽपि जातको राजा भवति। यदि लग्ने वर्गोत्तमनवांशः उदितः स्यात् चन्द्रो वा वर्गोत्तमनवांशे स्थितः स्यात् तथा इतरे चत्वारो ग्रहाः लग्नं पश्येयुः तर्हि नीचकुलोत्पन्नः जातकः अपि राजा भवति। तथाहि -

**गणोत्तमे लग्ननवांशकोद्गमे निशाकरश्चापि गणोत्तमेऽपि वा।**

**चतुर्ग्रहैश्चन्द्रविवर्जितैस्तदा निरीक्षितः स्यादधमोद्भवो नृपः।।** इति।

लग्नेशो यदि केन्द्रे नवमे वा स्थितो वर्गोत्तमनवांशे स्थितः स्यात्तथा नवमेशः उच्चस्थः स्वराशिगतो वा भूत्वा वर्गोत्तमनवांशे स्यात् तर्हि जातकः गजपृष्ठस्थहैमासनासीनः चामरयुगसम्भावितो राजा भवति।

प्रखरकिरणैर्युक्तश्चन्द्रः उच्चस्थेन स्वराशिगतेन वा दृष्टश्चेत् नीचकुलोत्पन्नोऽपि राजा भवति। यदि पूर्णकलाभिः किरणैश्च युक्तः चन्द्रः लग्नेतरकेन्द्रे स्थितो भवति तर्हि गजवाजिसेवितो राजा उत्पद्यते। लग्नस्थः शुक्रः अश्विनीस्थः त्रिभिः ग्रहैः दृष्टो भवति चेत् जातकः शत्रुञ्जयी राजा स्यात्। यदि लग्नेशः शुक्रेण युतो द्वितीयभावगतो भवेत् अथवा नीचराशिगतो न भवेत् तथा लग्नेशो बलवान् भवेत् तर्हि जातकः राजा भवति।

यदि मेषसिंहधनूराशिषु लग्नं स्यात्, लग्ने कुजः स्यात् मित्रग्रहैः दृष्टः स्यात्तर्हि जातकः राजा भवति। दशमेशः नवमे तथा नवमेशः दशमे चेत् प्रजाभिः प्रशस्तो राजा भवति। चन्द्रेण साकं सूर्यः धनुषो मध्यगतः, शनिः लग्नस्थः तथा बली कुजः उच्चस्थश्चेत् शत्रुदमनकारी प्रतापी राजा भवति। तथाहि ---

**चापार्धे भगवान् सहस्रकिरणस्तत्रैव ताराधिपोः**

**लग्ने भानुसुतेऽतिवीर्यसहितः स्वोच्चे च भूनन्दनः।**

**यद्येवं भवति क्षितेरधिपतिः संश्रुत्य दूरं भयात्**

**त्रस्ता एव नमन्ति तस्य रिपवो दग्धाः प्रतापाग्निना।।**

सुधाधवलबिम्बेन शोभितः चन्द्रः (पूर्णिमाचन्द्रः इत्यर्थः) यदि रवेर्नवांशे स्थितः स्यात् तथा पापग्रहैः युतः शुभग्रहः केन्द्रे स्यात् तर्हि जातकः राजा भवति। शत्रुराशिगतो नीचस्थो वा न भूत्वा त्रयः चत्वारो ग्रहाः सुधाधवलं चन्द्रं पश्यन्ति चेत् जातकः रिपुञ्जयी राजा भवति। यदि वर्गोत्तमांशस्थः चन्द्रः बलिना ग्रहेण दृष्टः तथा लग्ने पापग्रहः न स्यात्तर्हि जातकः सुन्दरकायः सार्वभौमिकः राजा भवति। बुध-जीव-चन्द्र-शुक्राः प्रखरकिरणैः युक्ताः नवमभावगताः स्युः अस्तंगताश्च न भवेयुः, मित्रग्रहैर्युताः दृष्टाः वा भवन्ति चेत् जातकः राजा भवति।

## स्वावलोकनप्रश्नः

**३) महाराजयोगद्वयं लिखत ?**

________________________________________

________________________________________

________________________________________

यदि शनि-गुरु-शुक्राः मीनराशौ, पूर्णचन्द्रः वृषभे मेषस्थो रविश्च कुजेन दृष्टश्चेत् जातकः राजा भवति। तस्य च महत्याः सेनायाः गमनेन उत्थितेन धूलिमण्डलेन सूर्यः अस्तंगत इव भाति तथा पद्मानि सङ्कुचितानि भवन्ति। तथाहि --

**शुक्रेद्वयौ सवितुः शिशुस्तिमियुगे स्वोच्चे च पूर्णः शशी**

**दृष्टस्तीव्रविलोचनेन दिनकृन्मेषोदयेऽसौ नृपः।**

**सेनायाश्चलनेन रेणुपटलैर्यस्य प्रविष्टे रवा-**

**वस्तभ्रान्तिसमाकुला कमलिनी सङ्कोचमागच्छति।।**

जातकस्य यदि रात्रौ जातस्य शुभाग्रहाः नीचस्थाः शत्रुग्रहस्थाश्च तृतीये षष्ठे एकादशे वा स्थिताः अथवा परमोच्चगताः प्रखरकिरणैर्युक्ताः केन्द्रस्थाः भवन्ति तथा चन्द्रः दशमभावस्थः चेत् जातकः त्रैलोक्याधिपतिः भवति। यदि पूर्णचन्द्रः वर्गोत्तमांशे स्थितः तर्हि जातकः यशस्वी, पराक्रमी राजा भवति। यदि चन्द्रः गुरुणा सह केन्द्रे स्यात् शुक्रेण दृष्टश्च स्यात्, कोऽपि ग्रहः नीचस्थो न स्यात् तर्हि जातकः राजा भवति।

यदि चन्द्रः जलचरराशौ तन्नवांशे वा स्थितः सन् लग्ने भवति, अथवा चन्द्रः शुभवर्गे स्ववर्गे वा स्थितः तथा केन्द्रः पापग्रहैः हीनः भवेत् तर्हि जातकः गजानां स्वामी प्रजाहितकरो राजा च भवति। तथाहि --

**जलचरराशिनवांशक इन्दुस्तनुभवने शुभदस्वकवर्गे।**

**अशुभकरः खलु कण्टकहीनो भवति नृपो बहुवारणनाथः।।** इति।

यदि शुक्रः गुरुणा दृष्टः स्यात् तर्हि राजकुलोत्पन्नो जातकः राजा भवति। मकरेतरराशिः लग्ने स्यात् तथा गुरुः लग्ने भवेत् चेत् जातकः मत्तगजनिकरयुक्तो राजा भवति। लग्नेशः जन्मराशीशो वा बली सन् केन्द्रगतश्चेत् जातको राजा भवति। बुधः गुरुणा दृष्टः चेत् राजाधिराजोऽपि जातकस्य वचः शृणोति। सः अतीव बुद्धिमान् भवति। तथाहि ---

**शुक्रो जीवनिरीक्षितो वितनुते भुपोद्भवं भूपतिं**

**देवेड्यो मृगभं विहाय तनुगो मत्तेभयुक्तं नृपम्।**

**केन्द्रे जन्मपतिर्बलाधिकयुतः कुर्याद् धरित्रीपतिं**

**दृष्टे वाक्पतिना बुधे दधति पृथ्वीशाश्च तच्छासनम्।।** इति।

जन्माङ्गे एको ग्रहः उच्चस्थः मित्रैर्दृष्टश्चेत् जातकः राजा भवति। उच्चस्थो ग्रहः मित्रग्रहैः युतश्चेत् जातकः धनाढ्यो भवति। रविः स्वनवांशे चन्द्रश्च स्वराशौ स्थितश्चेत् जातकः गजतुरगादिसमन्वितो राजा भवेत्। मीनराशिस्थः पूर्णचन्द्रः मित्रैर्दृष्टश्चेत्

जातकः विश्वस्य आह्लादको राजा भवति।

पूर्णचन्द्रः उच्चस्थश्चेत् जातकः त्यागी सज्जनवन्दनीयः राजा भवति। चन्द्र यदि अधिमित्रस्य नवांशे स्थितः शुक्रेण पूर्णदृष्टः स्यात्तर्हि जातकः धनाढ्यो राजा भवति। एवं स्थितौ गुरुणा दृष्टः चन्द्रः पृथ्वीपतिर्भवति।

जन्मलग्नेशः राशीशो वा यत्र तिष्ठति ततः त्रि-षष्ठ-एकादशेषु पापग्रहः अस्ति चेत्,

द्वितीयभावः कुजेन युतश्चेत्,

चतुर्थे रविशुक्रौ स्तः चेत् तथा

दशमैकादशलग्नेषु यथाक्रमं कुजशनिगुरवः सन्ति चेत् जातको राजा भवति।

तथाहि --

**पापास्त्रिशत्रुभवगा यदि जन्मनाथा-**
**ल्लग्नोद्धने कुजबुधौ हिबुकेऽर्कशुक्रौ।**
**कर्मायलग्नसहिताः कुजमन्दजीवा-**
**स्तज्ज्ञा वदन्ति चतुरस्त्विह राजयोगान्।।** इति।

नवमेश एकादशेशः द्वितीयेशः इतीमेषु एकः ग्रहः चन्द्रराशेः केन्द्रभावे स्थितः तदा एषु एकस्य स्वामी गुरुश्चेत् जातकः अखण्डसाम्राज्यस्य अधिपो भवति ।

## नीचभङ्गराजयोगाः

जातकस्य जन्माङ्गे यो ग्रहः नीचस्थो भवेत्, तद्राशिनाथः अथवा तस्य ग्रहस्य उच्चराशिनाथः यदि चन्द्रलग्नात् केन्द्रे स्यात् तर्हि नीचग्रहस्य नीचताभङ्गो भवति। जातकः राजा धार्मिकचक्रवर्ती च भवति। तथाहि --

**नीचस्थितो जन्मनि यो ग्रहः स्यात्**
**तद्राशिनाथोऽपि तदुच्चनाथः।**
**स चन्द्रलग्नात् यदि केन्द्रवर्ती**
**राजा भवेद्धार्मिकचक्रवर्ती।।** इति।

✹ यः ग्रहः नाचरीशगतः तद्राशिनाथः तस्य उच्चराशिनाथश्च यदि परस्परं केन्द्रगतः स्यात्तर्हि जातकः राजपूज्यः भवति।

✹ यः ग्रहः नीचराशिगतः स तद्राशिनाथेन दृष्टश्चेत् जातकः यशस्वी राजा भवति।

✹ नीचस्थो ग्रहः सुस्थाने स्थितः चेत् जातकः राजश्रेष्ठो भवति।

✹ ग्रहः नीचस्थः चेत् तद्राशीशः तदुच्चराशीशश्च जन्मलग्नात् जन्मराशेर्वा केन्द्रे स्याच्चेत् जातकः वैभवशाली, धार्मिकः, राजपूज्यः, यशस्वी, भाग्यवान्, चक्रवर्ती, राजा भवति।

✹ यो ग्रहः नीचस्थः तद्राशिनाथः तदुच्चनाथ इत्यनयोः एकः केन्द्रगश्चेत् जातकः राजा भवति।

## अधेनिर्दिष्टविषयेषु पठितग्रन्थानवलम्ब्य निबन्धान् भवान् विलिखतु

१. ज्योतिषस्य वेदाङ्गत्वं सप्रमाणं निरूपयत

२. मुहूर्तशास्त्रस्य महत्वं प्रतिपादयत

३. द्वादशभावाः सप्रमाणं विवेचनीयाः

४. दशाविचारं स्पष्टयत

५. कलौपाराशरीस्मृता विवृणुत

६. पञ्चमहापुरुषयोगाः सयुक्तिकं निरूपणीयाः

७. आयुर्दायसाधनक्रमम् उपवर्णयत

८. विवाहानुकूल्यचिन्तनं विवृणुत

९. षोडशसंस्कारेषु मुहूर्तस्य प्राशस्त्यं लिखत

१०. ग्रहाणां स्वरूपं निरूपयत

११. रव्यादिग्रहाणां गोचरस्थानानि सफलानि निरूपणीयानि

१२. किं कुर्वन्ति ग्रहाः सर्वे यस्य केन्द्रे बृहस्पतिः इति वाक्य समर्थयत

१३. प्रश्नशास्त्रमधिकृत्य बृहन्निबन्धो लेख्याः

१४. बृहज्ज़ातकस्य वैशिष्ट्यं लिखत

१५. राजयोगाः

१६. अरिष्टयोगान् सफलान् व्याख्यात

१७. षड्बलविचारः

१८. षड्वर्गः सोदाहरणं विवेचनीयः

१९. विंशोत्तरीदशासाधनक्रमः तथा अन्तर्दशासाधनक्रमश्च सफलः चिन्त्यः

२०. दैवज्ञलक्षणानि

२१. प्रवज्यायोगः

२२. संहितास्कन्धमुद्दिश्य निबन्धो लेख्यः

२३. दकार्गलम्

२४. बृहत् संहितोक्त पर्जन्यगर्भलक्षणमधिकृत्य लिखत

२५. शकुनशाॗमधिकृत्य निबन्धो लेख्यः

२६. वेदालज्योतिषमधिकृत्य निबन्धो लेख्यः

२७. कुजदोषविचारः

२८. रवेः द्वादशभावफलं निरूपयत